GOVERNMENT OF TAMILNADU

# संस्कृतमनोहरी

# SANSKRIT READER
## XII STD

“ सह नाववतु सह नौ भुनक्तु
सह वीर्यं करवावहै ”

Department of School Education

**Untouchability is Inhuman and a Crime**

XII Introduction Pages.indd 1 18-03-2019 13:07:06

**Government of Tamil Nadu**

First Edition - 2019
Reprint - 2020, 2021, 2022, 2023, 2024

Published under New Syllabus

**Content Creation**

State Council of Educational Research and Training

© SCERT 2019

**Printing & Publishing**

Tamil NaduTextbook and Educational Services Corporation

www.textbooksonline.tn.nic.in

# आमुखम् - Preface

"विद्याधनं सर्वधनप्रधानम्" इत्युक्तिः। अत एव मनुष्याः तद्धनमार्जयितुं यतन्ते। तत्रापि बालकाः विद्यालयेषु छात्रान् भूत्वा तदार्जयन्ति। यतो हि, विद्यया विना कस्यापि गौरवं न आगच्छति। विद्या गुरूणां गुरुः भवति।

अद्यत्वे केवलं पुस्तकस्था विद्या छात्राणां सुखकरी न भवति। सैव विद्या भवति या भविष्यत्काले स्वस्वप्नं वास्तविकं कर्तुम् उपयुक्ता भवेत्। अतः अद्यत्वे पुस्तकीयज्ञानेन सह प्रायोगिकज्ञानसंपादनाय अवसरः प्रकल्पितः विद्यते।

परं भारतीयाः महर्षयः शिष्येभ्यः तादृशीमेव ज्ञानकरीं विद्याम् अबोधयन् इत्ययं विषयः संस्कृतग्रन्थैः ज्ञायते। अतः छात्राणां कृते संस्कृताध्ययनं महदुपकारं कल्पयति। तत्र विद्यामानाः वेदस्मृत्यादयः ग्रन्थाः छात्राणां कृते भारतीयसंस्कृतिं संबोध्य, सन्मार्गप्रवर्तने धर्मेण वर्तितुं च उत्साहं जनयति।

प्रस्तुतं द्वादशकक्ष्यायाः कृते निर्मितमिदं संस्कृतपाठ्यपुस्तकं तावत् अस्माकं संस्कृतिं, देशस्य औन्नत्यं, सनातनधर्मस्य च महत्वं कथयति। इदं यथा छात्राणां श्रवण-भाषण-पठन-लेखनमिति चत्वारि कौशलानि विकसितानि भवेयुः, छात्राः अत्रोक्तैः नीतिविषयैः अस्माकं संस्कृतिं ज्ञात्वा, पूर्वजानां आचारमवगत्य च सदा सन्मार्गप्रवर्तने यतेयुः, मिथ्याज्ञानमपाकृत्य वास्तविकं ज्ञानं प्राप्नुयुः, केवलं मौखिकपठनम् अपाकृत्य सचिन्तनं व्यवहर्तुं प्रयत्नं कुर्युः, एवं च पारम्परिकभाषात्वेन विद्यमानया तमिल्भाषया सह तुलनां कृत्वा उभयोः तमिल्संस्कृतयोः महत्वं जानीयुः, तथा निर्मितं पाठ्यपुस्तकं छात्राणां सर्वाङ्गीनविकासाय स्वलक्ष्यप्राप्तये च शिक्षकसमित्या परिकल्पितं विद्यते।

अस्मिन् पाठ्यपुस्तके प्रधानतया गद्यं, पद्यं, व्याकरणमिति भागत्रयं वर्तते। एकैकस्मिन् विभागे शब्दकोशः, अर्थकोशः, अर्थज्ञानकौशलाभ्यासाः, भाषाज्ञानकौशलाभ्यासाः, कौशलवर्धनावृत्यभ्यासाः इति लक्ष्येषु विषयाः संकलिताः सन्ति।

अर्थज्ञानकौशलाभ्यासे प्रश्नाः पृष्टाः सन्ति। एते प्रश्नाः पाठविषयमभिप्रेत्य पृष्टाः। ततः परं भाषाज्ञानकौशलवर्धकाः प्रश्नाः सन्ति।

गद्यभागे स्थितानां पाठानां पदशब्दप्रयोगमधिकृत्य विषयाः स्थापिताः सन्ति । व्याकरणं च पाठाननुसृत्य अध्यापनीयमिति मत्वा तथा व्याकरणविषयाः निबद्धाः सन्ति यथा छात्राः सुलभेन पाठान् अवगच्छेयुः । तदतिरिच्य छात्रावगमनशक्तिं वर्धयितुम् अनुच्छेदलेखनम्, अनुवादः इति भागद्वयं परिकल्पितं विद्यते।



XII Introduction Pages.indd 3 18-03-2019 13:07:07

## देशीयगीतम्

जन गण मन अधिनायक जय हे
भारत भाग्य विधाता
पञ्जाब सिन्धु गुजरात मराठा
द्राविड उत्कल बङ्गा
विन्ध्य हिमाचल यमुना गङ्गा
उच्छल जलधि तरङ्गा
तव शुभ नामे जागे
तव शुभ आशिष मागे
गाहे तव जय गाथा
जन गण मङ्गल दायक जय हे
भारत भाग्य विधाता
जय हे जय हे जय हे
जय जय जय जय हे !

महाकवि रवीन्द्रनाथ ठाकुरः

अस्पृश्यत्वम् अपचारः
अस्पृश्यत्वम् अपराधः
अस्पृश्यत्वम् अमानवधर्मः

## राष्ट्रिय प्रतिज्ञा

सर्वे वयं भारतदेशबालाः
स्वातन्त्र्यपीयूषसरोमरालाः ।
नीचोच्चजात्यादिविभेदशून्याः
सर्वे समानाश्च सहोदराश्च ।। ।।1।।

एको भावः सर्वसंक्षेपरूपः
एका भाषा भूतकारुण्यरूपा ।
एकं लक्ष्यं सामरस्यं समेषां
एकं तत्वं चित्तमानन्दपूर्णम् ।। ।।2।।



XII Introduction Pages.indd 4 18-03-2019 13:07:07

# SANSKRIT AND CULTURE GO TOGETHER

- Swami Vivekananda

## OBJECTIVES:-

- To create interest in Sanskrit learning.
- To make the school going children to understand the precepts and practice of Indian culture and to inherit the leadership qualities.
- To enjoy the ancient classic with aesthetic experience.
- To prepare the students to speak, quote and compare Sanskrit with other languages.
- To morally and ethically enrich the attitude of students in order to make them as noble citizens of India.

Tamil and Sanskrit are friendly Classical languages of our motherland for so many centuries.

Both the languages have mutual affinity to each other. Hence the learning of Sanskrit language in Tamil Nadu would help the comparative studies in future.

Of course, Sanskrit learning along with Tamil (उभयप्रधान) mutually giving importance to each other was in vogue for many decades.

However, an attempt through this preparation of Textbooks has been made to enthuse the students not only to read Sanskrit in its original tongue but also to understand the merits of both the classical languages.

The listening and understanding the meaning of the word and sentences deeply reflecting the values and contents would be highly useful for the students of today.

The present preparation of the Sanskrit Textbooks for the Class 12 adopt the modern methodology by way of framing typical questions that would enhance the memory as well as the language speaking skills of the students.

Meticulous care has been taken to select portions suitable to the respective standards after comparing the contents of Sanskrit books prescribed in various standards in various states.

Apart from the course book and the workbook, study materials are given for additional reading to enrich the knowledge of the students.

The assessment and the examination pattern are in par with other languages taught in unified syllabus of Tamil Nadu.

**-Text Book Committee**



XII Introduction Pages.indd 5 18-03-2019 13:07:07

## विषयसूची – (INDEX)


| भागः (Unit) | विषयः (Topic) | पृष्ठसंख्या (Page No.) |
|---|---|---|
| 1. पद्यम् | द्रविडसूक्तयः | 1 |
| गद्यम् | उत्तिष्ठत – जाग्रत | 7 |
| व्याकरण-अभ्यासः - 1 | अस्मद् शब्दः, युष्मद् शब्दः | |
| अनुच्छेदः | अनुच्छेदः - 1 | |
| अनुवादः | अनुवादः - 1 | |
| 2. पद्यम् | प्रकृतिसौन्दर्यम् | 15 |
| गद्यम् | शिक्षापरीक्षा | 21 |
| व्याकरण-अभ्यासः - 2 | धातुः - परस्मैपदी - लोट् लकारः | |
| अनुच्छेदः | अनुच्छेदः - 2 | |
| अनुवादः | अनुवादः - 2 | |
| 3. पद्यम् | रसपद्यानि | 33 |
| गद्यम् | संसर्गः | 40 |
| व्याकरण-अभ्यासः - 3 | तद् शब्दः (पुं, स्त्री, नपुं) | |
| अनुच्छेदः | अनुच्छेदः - 3 | |
| अनुवादः | अनुवादः - 3 | |
| 4. पद्यम् | चारवचनम् | 47 |
| गद्यम् | पर्यावरणम् | 54 |
| व्याकरण-अभ्यासः - 4 | धातुः - परस्मैपदी - विधिलिङ् लकारः | |
| अनुच्छेदः | अनुच्छेदः - 4 | |
| अनुवादः | अनुवादः - 4 | |
| 5. पद्यम् | आरोग्यभोजनम् | 62 |
| गद्यम् | साधुवचनम् | 67 |
| व्याकरण-अभ्यासः - 5 | किम् शब्दः (पुं, स्त्री, नपुं) | |
| अनुच्छेदः | अनुच्छेदः - 5 | |
| अनुवादः | अनुवादः - 5 | |
| 6. पद्यम् | अमृतवाणी | 75 |
| गद्यम् | संस्कृते विज्ञानम् | 82 |
| व्याकरण-अभ्यासः - 6 | धातुः - आत्मनेपदी - लोट् लकारः | |
| अनुच्छेदः | अनुच्छेदः - 6 | |
| अनुवादः | अनुवादः - 6 | |
| 7. पद्यम् | अलङ्कारः | 90 |
| गद्यम् | गुणत्रयम् | 97 |
| व्याकरण-अभ्यासः - 7 | भवत्, सरित्, मनस् शब्दाः | |
| अनुच्छेदः | अनुच्छेदः - 7 | |
| अनुवादः | अनुवादः - 7 | |
| व्याकरणसेतुः | पाठ्यातिरिक्तव्याकरणपरिचयः | |




XII Introduction Pages.indd 6 18-03-2019 13:07:07

# मङ्गलाचरणम्

## ऐक्यमन्त्रः

यं वैदिका मन्त्रदृशः पुराणाः
इन्द्रं यमं मातरिश्वानमाहुः ।
वेदान्तिनोऽनिर्वचनीयमेकं
यं ब्रह्मशब्देन विनिर्दिशन्ति ।। ।।1।।

शैवा यमीशं शिव इत्यवोचन्
यं वैष्णवा विष्णुरिति स्तुवन्ति ।
बुद्धस्तथार्हन्निति बौद्धजैनाः
सच्छ्री अकालेति च सिक्कसन्तः।। ।।2।।

शास्तेति केचित् कतिचित् कुमारः
स्वामीति मातेति पितेति भक्त्या
यं प्रार्थयन्ते जगदीशितारं
स एक एव प्रभुरद्वितीयः ।। ।।3।।



XII Introduction Pages.indd 7 18-03-2019 13:07:07

“Sanskrit is like the river Ganga for our languages, If it were to dry up, the regional languages also would lose their vitality and power.”

**– Mahatma Gandhiji**

“The past has gone and the present is with us and we work for thefuture, But I have no doubt that whatever shape that future may take, one of the biggest, the strongest and the most powerful and the most valued, of our legacies will be the Sanskrit language.”

**– Pandit Jawaharlal Nehru**

“Sanskrit is the most suitable language that could be made the official language.”

**– Dr. Ambedkar**

“I often wonder which is the most important of the many things that have distinguished India in the past, in its history of years. I have no doubt at all in my mind that it is the Sanskrit language. It is that which has embodied the genius and wisdom of our race. Almost everything that has come out in later years can somehow be found to have sprung from this ancient language only.”

**- Dr. S. Radhakrishnan**



XII Introduction Pages.indd 8 18-03-2019 13:07:07

# प्रथमः पाठः 1

## Lesson 1

# द्रविडसूक्तयः

तिरुक्कुरल् ग्रन्थः द्रविडभाषायां प्रसिद्धः अस्ति । अस्मिन् ग्रन्थे मनुष्यजीवनस्य अत्यावश्यकविषयाः भवन्ति। अयं ग्रन्थः बहुभिः विद्वद्भिः संस्कृतभाषायाम् अनुवादः कृतः अस्ति। तेषु अप्पादीक्षितस्य अनुवादः "सुनीति कुसुममाला" इति नाम्ना प्रसिद्धः। तस्मात् केचन श्लोकाः पाठनार्थं प्रदत्ताः विद्यन्ते ।



### भगवद्भक्तिः – கடவுள் வாழ்த்து

समस्तशास्त्रचिन्तनैरहर्निशं च किं फलम् ।
महेशपादवन्दनं हृदापि नातनोति चेत् ।। 1

கற்றதனால் ஆய பயனென்கொல் வாலறிவன்
நற்றாள் தொழாஅர் எனின்

### धर्ममहिमा – அறன் வலியுறுத்தல்

अमर्षणं गुणस्पृहा प्रकोपनं च दुर्वचः ।
मनोमलं विनामुना कृतं तु धर्मतास्पदम् ।। 2

அழுக்காறு அவாவெகுளி இன்னாச்சொல் நான்கும்
இழுக்கா இயன்றது அறம்.

### सत्पुत्रः - மக்கட்பேறு

समस्तशास्त्रवल्लभः सुतस्तवेति सन्मुखात् ।
निशम्य पुत्रलाभतः परं प्रसूः सुखं भजेत् ।। 3

ஈன்ற பொழுதின் பெரிதுவக்கும் தன்மகனைச்
சான்றோன் எனக்கேட்ட தாய்.

### सान्त्ववचनम् – இனியவை கூறல்

सुखप्रदार्थवाचकैः पदैः कृता हि सान्त्वना ।
अधर्मसंक्षयं तथा तनोति धर्मवर्धनम् ।। 4

அல்லவை தேய அறம்பெருகும் நல்லவை
நாடி இனிய சொலின்



Unit 1.indd 1 18-03-2019 12:05:59

सुशीलम् – ஒழுக்கமுடைமை

सुवृत्तनिष्ठता परं प्रसौति धर्मसन्ततिम् ।
चिनोति पापमुत्कटं कपूयशीलवर्तनम् ।। 5

நன்றிக்கு வித்தாகும் நல்லொழுக்கம் தீயொழுக்கம்
என்றும் இடும்பை தரும்

क्षमा – பொறையுடைமை

प्रतिक्रियाकृतां सुखं तदात्व एव जायते ।
कृतापराधमर्षिणां यशः सुखं लयावधि ।। 6

ஒறுத்தார்க்கு ஒருநாளையின்பம் பொறுத்தார்க்குப்
பொன்றுந்துணையும் புகழ்

निष्फलवचनपरिहारः – பயனில சொல்லாமை

ततो बुधस्तु निष्फलं वचः कदापि नो वदेत् ।
फलेन संहितं वचः प्रकाशयेत्पुरः सताम् ।। 7

சொல்லுக சொல்லில் பயனுடைய சொல்லற்க
சொல்லில் பயன்இலாச் சொல்

कीर्तिः – புகழ்

प्रदानधर्मनिष्ठया महायशः प्रयत्नतः ।
प्रसाधयेत् गृहाश्रमी तदेव जीवतः फलम् ।। 8

ஈதல் இசைபட வாழ்தல் அதுஅல்லது
ஊதியம் இல்லை உயிர்க்கு

कोपपरिहारः – வெகுளாமை

य आत्मनो हि रक्षकः स कोपशत्रुमुद्धरेत् ।
न चेदयं हि पातयेदमुं तपोधनं हरन् ।। 9

தன்னைத்தான் காக்கின் சினங்காக்க காவாக்கால்
தன்னையே கொல்லும் சினம்.

अहिंसा – கொல்லாமை

विभक्तभोज्यवस्तुभिः समस्तजीवरक्षणम् ।
वनस्थधर्मसंततौ प्रशस्तमुच्यते बुधैः ।। 10

பகுத்துண்டு பல்உயிர் ஓம்புதல் நூலோர்
தொகுத்தவற்றுள் எல்லாம் தலை.

कविपरिचयः अप्पादीक्षितेन लिखितः "सुनीति कुसुममाला" ग्रन्थः तिरुक्कुरल् ग्रन्थस्य प्रसिद्धः अनुवादः अस्ति। अयं कविः महामहोपाध्यायः श्री अप्पैय्यदीक्षितस्य वंशे जातः। श्री अप्पादीक्षितः "आयिल्य तिरुनाल्" महाराजस्य आस्थानकविः आसीत्।

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

| | | | |
|---|---|---|---|
| 1. | वल्लभः | - | expert |
| 2. | सुतः | - | son |
| 3. | प्रसूः | - | parent |
| 4. | सुवृत्तनिष्ठता | - | good conduct |
| 5. | कपूयशीलम् | - | worthless character |
| 6. | अमर्षणम् | - | intolerant |
| 7. | प्रकोपनम् | - | great anger |
| 8. | दुर्वचः | - | hurting words |
| 9. | आस्पदम् | - | an abode |
| 10. | तपोधनम् | - | treasure that is penance. |

### II. अधो निर्दिष्टानां पदानां विपरीतपदानि लिखत-

| | | | | | |
|---|---|---|---|---|---|
| 1. सुखम् | × | दुःखम् | 2. लाभः | × | नष्टः |
| 3. अहः | × | निशा | 4. निष्फलम् | × | सफलम् |
| 5. सुशीलम् | × | कुशीलम् | 6. सुवृत्तम् | × | दुर्वृत्तम् |
| 7. परम् | × | अपरम् | 8. दुर्वचः | × | सुवचः |
| 9. कीर्तिः | × | अपकीर्तिः | 10. बुधैः | × | मूढैः |

### III. अधो विद्यमानानां पदानां व्याकरणरूपं लिखत-

1. आतनोति – लट् लकारः, प्रथमपुरुषः, एकवचनम् of तन् with आ to think
2. प्रसौति – लट् लकारः, प्रथमपुरुषः, एकवचनम् of सु with प्र to give born
3. चिनोति – लट् लकारः, प्रथमपुरुषः, एकवचनम् of चिन् to give
4. विना – अव्ययम्, meaning without.
5. जायते – लट् लकारः, आत्मनेपदी, प्रथमपुरुषः, एकवचनम् of जन् to be born



Unit 1.indd 3 18-03-2019 12:05:59

6. सताम् – सत् शब्दस्य षष्ठी बहुवचनम्, meaning wise

7. प्रकाशयेत् – विधिलिङ् लकारः, प्रथमपुरुषः, एकवचनम् of काश् with प्र to shine

8. उच्यते – कर्मणि- लट् लकारः, प्रथमपुरुषः, एकवचनम् of वद् to tell

## IV. यथोचितं सन्धिम् अथवा सन्धिविच्छेदं कुरुत-

1. कदापि = कदा + अपि
2. नातनोति = न + आतनोति
3. पापमुत्कटम् = पापम् + उत्कटम्
4. विनामुना = विना + अमुना
5. तवेति = तव + इति
6. गृहाश्रमी = गृह + आश्रमी
7. पातयेदमुम् = पातयेत् + अमुम्
8. प्रशस्तमुच्यते = प्रशस्तम् + उच्यते
9. बुधस्तु = बुधः + तु
10. चेदयम् = चेत् + अयम्

## V. अधोलिखितानां पदानां विग्रहं लिखत-

1. अहर्निशम् – अहश्च निशा च ।
2. शास्त्रवल्लभः – शास्त्रेषु वल्लभः ।
3. धर्मवर्धनम् – धर्मस्य वर्धनम् ।
4. महेशपादवन्दनम् – महेशस्य पादौ, तयोः वन्दनम् ।
5. सुखप्रदार्थम् – सुखं प्रदास्यति इति, तस्य अर्थः, तम्
6. अमर्षणं – न मर्षणं यत्र तत् ।
7. दुर्वचः – दुष्टः वचः ।
8. सन्मुखात् – सतां मुखं, तस्मात् ।
9. तपोधनं – तप एव धनं यस्य सः, तम् ।
10. धर्मतास्पदं – धर्मस्य भावः धर्मता, तस्याः आस्पदम् ।
11. मनोमलं – मनसः मलम् ।
12. निष्फलम् – फलस्य अभावः ।



Unit 1.indd 4 18-03-2019 12:05:59

## VI. अधः प्रदत्तानां शब्दानां समानार्थकं पदं लिखत-

1. अहः – दिनम् ।　　2. निशा – रात्री ।

3. पुत्रः – सुतः ।　　4. वर्धनं – वृद्धिः ।

## VII. समीचीनम् उत्तरं चिनुत-

1. "सुनीतिकुसुममाला" ग्रन्थस्य रचयिता कः?

   (i) नीलकण्ठदीक्षितः　(ii) अप्पादीक्षितः　(iii) श्रीकण्ठशास्त्री

2. समस्तशास्त्रचिन्तना कदा कर्तव्या?

   (i) दिने दिने　(ii) अहर्निशम्　(iii) निशायाम्

3. कस्य पादवन्दनं फलम् आतनोति?

   (i) महेशपादवन्दनम्　(ii) सुरेशपादवन्दनम्　(iii) देवेशपादवन्दनम्

4. को धर्मः सन्ततिं प्रसौति?

   (i) कुवृत्तनिष्ठता　(ii) सुवृत्तनिष्ठता　(iii) व्रतनिष्ठता

5. किं कपूयशीलवर्तनं चिनोति?

   (i) पापमुत्कटम्　(ii) पुण्यमुत्कटम्　(iii) शीलमुत्कटम्

6. कृतापराधमर्षिणां किं फलम्?

   (i) धनः सुखम्　(ii) मनः सुखम्　(iii) यशः सुखम्

7. कः कोपशत्रुम् उद्धरति?

   (i) देहरक्षकः　(ii) धनरक्षकः　(iii) आत्मरक्षकः

8. कथं भोजनं कर्तव्यम् ?

   (i) त्याज्य　(ii) विभज्य　(iii) संयोज्य

9. सन्मुखात् वल्लभः तव सुतः इति श्रुते का सुखं भजेत् ?

   (i) भ्राता　(ii) माता　(iii) भगिनी

10. कीदृशं वचः बुधैः न अनुसरते?

   (i) दुर्लभम्　(ii) सुलभम्　(iii) निष्फलम्



Unit 1.indd 5　18-03-2019 12:05:59

## VIII. अधो दत्तानां प्रश्नानाम् उत्तरं लिखत -

1. भगवद्भक्तिम् अधिकृत्य लिखत ?
2. धर्मस्य लक्षणं किम् ?
3. माता कदा सन्तुष्टा भवति ?
4. का धर्मवर्धनं तनोति ?
5. सुशीलदुःशीलयोः फलं किम् ?
6. क्षमायाः प्रयोजनं किम् ?
7. सतां वचनं कीदृशम् ?
8. जीवनस्य फलं कदा भवेत् ?
9. कोपस्य परिणामः कीदृशः ?
10. बुधैः किं प्रशस्तमुच्यते?

## IX. सविस्तरम् उत्तरं लिखत-

1. द्रविडसूक्तितः त्रीन् श्लोकान् व्याख्यात ।
2. अप्पादीक्षितेन प्रोक्तेषु नीतित्रयं यथाग्रन्थं विवृणुत ।

***********

### पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

श्लोकोऽयं विषयममुं प्रकटयति –

अप्पय्यदीक्षितशिखामणिवंशसार-
मुक्ताफलेन कविमार्गविचक्षणेन ।
अप्पाभिधानशिशुना रचितेयमार्यै-
रङ्गीकृता भवतु धर्मसरोरजमाला ।।

केचन तिरुक्कुरल् अनुवादः – संस्कृते -

| S.No. | लेखकः (Author) | ग्रन्थः (Text) |
|---|---|---|
| 1. | श्रीरामदेशिकः | तिरुक्कुरल् अनुवादः |
| 2. | श्रीचक्रपाणिः | सुनीतिकुसुममाला |
| 3. | कलियन् श्रीवानमामलै जीयर् | तिरुक्कुरल् – संस्कृतश्लोकरूपानुवादः |

# द्वितीयः पाठः 2

## Lesson 2

# उत्तिष्ठत – जाग्रत

आधुनिकभारतस्य निर्माणे बहूनां युगपुरुषाणां योगदानं वर्तते। ते पुरुषाः भारतं श्रेष्ठतमं कर्तुं बहुधा अयतन्त। तेषु विवेकानन्दस्य नाम अनितरसाधारणं विद्यते। सः न केवलं भारते, अपि तु सम्पूर्णविश्वे आध्यात्मलोकं विकीर्णयति स्म। अपि च जनान् भारतीयाचारान् बोधयन् अजागरयत्। अतः अस्मिन् पाठे कथं सः जनान् अजागरयत् इति सपरिचयं विव्रियते।




वङ्गप्रान्तस्य कोल्कत्तानगरे 1863 तमे वर्षे जनवरि मासस्य द्वादशे दिने विवेकानन्द-महाशयस्य जन्म अभवत् । तस्य पितरौ श्रीविश्वनाथदत्तमहोदयः श्रीमती भुवनेश्वरी च । प्रथमं तस्य नाम नरेन्द्रनाथदत्तः इति आसीत् । बाल्यादारभ्य अयम् अध्ययने पटुः आसीत् । सः क्रमेण एकाग्रमनसा ध्याने मग्नः सन्मार्गम् आश्रित्य सामान्यजनानां मार्गदर्शकः अभूत् ।

सः कोलकत्ता-नगरे प्रेसिडेन्सी-कलाशालायां बी.ए अध्ययनं कृतवान् । तदनन्तरं न्यायशिक्षाम् आरेभे । किञ्चित् कालानन्तरं तस्य आत्मविषयक - अध्ययने अभिरुचिः जाता । अस्मिन्नेव समये दैवयोगात् दक्षिणेश्वरस्य कालीमन्दिरे श्रीरामकृष्णपरमहंसस्य दर्शनं सञ्जातम् । एषः एव नरेन्द्रस्य अध्यात्म - गुरुः अभवत् । सन्यासदीक्षानन्तरं नरेन्द्रस्य नाम विवेकानन्दः इति अभवत् ।

सः पञ्चविंशति तमे वयसि संपूर्णभारतस्य भ्रमणम् अकरोत् । तत्र भारतीयसंस्कृत्याः सनातनधार्मिकप्रचारं प्रसारं च अकरोत् । समाजस्य राष्ट्रस्य च ऐक्यभावनिर्माणमेव तस्य संकल्पम् आसीत् ।

अयं स्वामी विवेकानन्दः 1893 तमे वर्षे अमेरीकादेशस्य शिकागो-नगरे विश्वधर्मसभायां भारतस्य प्रतिनिधिरूपेण गतवान् । तत्र सम्मेलने "भगिन्यः भ्रातरश्च (Sisters & Brothers) अमेरिकावासिनः " इति स्वभाषणम् आरब्धवान् । तदा सभायां सर्वत्र आमोदः करघोषश्च सञ्जातः। सः स्वभाषणे "विविध धर्मेषु जाताः जनाः सर्वे अन्तिमे (स्थानं) एकमेव भगवन्तं प्राप्नुवन्ति " इति अवदत् ।

सः देशोद्धाराय युवकान् प्रेरितवान् । जनसेवा, स्वास्थ्यरक्षा, स्त्रीशिक्षा, आधुनिक - उद्योगिकी प्रभृतिषु क्षेत्रेषु असाधरणं कार्यं कर्तुं रामकृष्णमिशन् इति संस्थां संस्थाप्य जनेषु जागरणं कृतवान् । स्वामीविवेकानन्देन उल्लिखितं कठोपनिषद् वाक्यम् अद्यापि भारतीयान् प्रेरयति -

" उत्तिष्ठत, जाग्रत, प्राप्य वरान् निबोधत " इति ।

तस्य उपदेशानां सारः एवम् अस्ति -

"निर्भयो भव । राष्ट्रदेवो भव । उत्तिष्ठ । बलम् अवलम्बस्व । हे मनुष! दुर्बलो मा भूः । नरस्य सेवा महेशस्य सेवा । सर्वैः स्नेहभावेन भवितव्यम्" इति ।

## अभ्यासः

### I. कठिनशब्दार्थः -

1. महाशयः - great personality
2. पटुः - clever
3. प्रचारः - publicity
4. प्रसारः - spread over
5. ऐक्यभावः - integrity
6. संकल्पः - vow
7. प्रेरणा - inspiration
8. युवकः - youth
9. प्रमाणम् - authority
10. प्रतिनिधिः - representative


Unit 2.indd 8 18-03-2019 12:10:14

## II. समीचीनम् उत्तरं चिनुत-

1. विवेकानन्दस्य माता का ?

   (i) कामेश्वरी (ii) भुवनेश्वरी (iii) ललितेश्वरी

2. विवेकानन्दनस्य पिता कः?

   (i) विश्वनाथदत्तः (ii) वैद्यनाथदत्तः (iii) नरेशदत्तः

3. विवेकानन्दस्य पूर्वाश्रम - नाम किम्?

   (i) सुरेन्द्रनाथदत्तः (ii) नरेन्द्रनाथदत्तः (iii) भूपेन्द्रनाथदत्तः

4. कः नरेन्द्रस्य अध्यात्मगुरुः?

   (i) श्रीरामनाथः (ii) श्रीरामकृष्णः (iii) श्रीरामदासः

5. विवेकानन्दः कस्मिन् वयसि भारतस्य भ्रमणमकरोत्?

   (i) चतुर्विंशतिः (ii) नवविंशतिः (iii) पञ्चविंशतिः

6. विवेकानन्दः समाजस्य किमर्थं प्रयत्नमकरोत्?

   (i) भेदभावार्थम् (ii) अन्यभावार्थम् (iii) ऐक्यभावार्थम्

7. विवेकानन्दः "उत्तिष्ठत - जाग्रत" इति वाक्यं कुतः स्वीकृतवान्?

   (i) केनोपनिषदः (ii) कठोपनिषदः (iii) प्रश्नोपनिषदः

8. सन्यासदीक्षानन्तरं नरेन्द्रस्य नाम किम्?

   (i) विवेकानन्दः (ii) सदानन्दः (iii) कृष्णानन्दः

9. स्वामी विवेकानन्दः भाषणार्थं कुत्र गतवान् ?

   (i) शिकागो (ii) वाषिङ्टन् (iii) पारीस्

10. स्वामी विवेकानन्दः देशोद्धाराय कान् प्रेरितवान् ?

   (i) बालान् (ii) युवकान् (iii) वृद्धान्

## III. अधो दत्तानां प्रश्नानाम् उत्तरं लिखत -

1. स्वामी विवेकानन्दस्य जन्म कदा कुत्र च अभवत्?
2. स्वामी विवेकानन्दस्य पितरौ कौ ?
3. विवेकानन्दः कस्यां कलाशालायाम् अध्ययनं कृतवान् ?
4. नरेन्द्रस्य कस्मिन् विषयक - अध्ययने अभिरुचिः जाता ?



Unit 2.indd 9 18-03-2019 12:10:14

5. विवेकानन्दस्य संकल्पं किमासीत् ?

6. विवेकानन्दस्य अध्यात्मगुरुः कः? तस्य दर्शनं कुत्र सञ्जातम् ?

7. विवेकानन्दः अमेरिकावासिनं कथम् आह्वयत ?

8. विवेकानन्दः असाधारणं कार्यं कर्तुं कां संस्थाम् अस्थापयत् ?

9. विवेकानन्दस्य उपदेशवाक्यं किम् ?

10. स्वामी विवेकानन्दः कस्मिन् वर्षे शिकागो नगरे अस्माकं गौरवं प्रतिष्ठापितवान्?

## IV. सविस्तरम् उत्तरत-

1. स्वामी विवेकानन्दम् अधिकृत्य यथामति स्वभाषया संक्षिप्य लिखत ।

2. उत्तिष्ठत - जाग्रत इति पाठं संगृह्य लिखत ।

## V. रिक्तस्थानानि पूरयत –

1. नरेन्द्रस्य जन्म ________ नगरे अभवत् ।

2. नरेन्द्रस्य माता ________ ।

3. विवेकानन्दः ________ नामके कलाशालायां बी.ए. अध्ययनं कृतवान् ।

4. स्वामी विवेकानन्दस्य ________ अध्ययने अभिरुचिः जाता ।

5. विवेकानन्दः शिकागो सम्मेलने ________ इति स्वभाषणम् आरब्धवान् ।

***********

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

### स्वामिनः तीर्थयात्रा

सन्यासी एकस्मिन्नेव स्थाने चिरं न तिष्ठेत् । मठः अपि कारागारसदृशः । एकस्मिन् प्रदेशे अनुबन्धः अपि दोषाय एव । नरेन्द्रः संन्यासी भूत्वा 'विवेकानन्दः' अभवत् । भारतदेश एव तस्य गृहं, भारतीयाः सर्वे तस्य सहोदराः । तेन कारणेन सः देशे पर्यटनं कृतवान् । काषायवस्त्रदण्डकमण्डलादयः एव तस्य सम्पदः अभवन् । पर्यटनं कुर्वन् सः अनेकपुण्यक्षेत्राणि सन्दृष्टवान् । पर्णशालासु धर्मशालासु वसन् भूतले निद्रां करोति स्म । भिक्षाटनं कृत्वा उदरपूरणं, साधुभिः सह सहवासः, धार्मिकचर्चाभिः पुण्यकर्मभिः कालयापनं, पादाभ्यां गमनं तस्य दिनचर्या आसीत् । कोऽपि सहृदयः वाहनबालकः लभ्यते चेत् तस्य प्रवासः तेन सह भवति स्म । विवेकानन्देन दृष्टं प्रथमक्षेत्रं वाराणसी । तत्र कतिचन दिनानि निवसन् तत्रत्यपण्डितान् स्वीयविचारान् श्रावितवान् । तत्त्वशास्त्रसम्बद्धचर्चायां तान् जितवानपि । अयोध्यायां सीतारामयोः स्मृतिभिः तस्य ऊहालोकः नन्दितः।

### कन्याकुमर्यां स्वामी विवेकानन्दः

स्वामी रामेश्वरं गत्वा ततः अन्ते कन्याकुमारीं प्राप्तवान् । समुद्रे प्लवनं कुर्वन् शिलामेकां दृष्ट्वा तत्र उपविष्टवान् । एवं समुद्रमध्ये उपविश्य भारतदेशस्य विषयकचिन्तने मग्नः अभवत् । देशे प्रजाः पीडयन्ती दारिद्र्यदशा तं दुःखितम् अकरोत् । कुलतत्वस्य निर्मूलनेन विना स्वदेशप्रजानां विमुक्तिः न भवतीति निर्णीतवान् । विवेकानन्दः पाश्चात्यदेशेषु पर्यटन् तत्रत्यानां कृते भारतीय - आध्यात्मिकसम्पदः वैशिष्ट्यं, महत्वं च स्पष्टीकरणमेव स्वस्य प्रथमकर्तव्यमिति निर्णीतवान् । ततः निद्रां कुर्वतः स्वदेशीयान् प्रबोधयेयमिति चिन्तितवान् । नरेन्द्ररूपेण स्थितः वङ्गराज्यस्य लघुदीपः विवकानन्दरूपेण समग्रभारतस्य कृते कान्तिप्रदा महाज्वाला इव परिणतः अभवत् ।

### स्वदेश - प्रत्यागमनम्

स्वामीमहाभागस्य स्वदेश - प्रत्यागमनम् एकं महद्वृत्तम् । प्रत्यावर्तमाने तस्मिन् समग्रो देशः तस्मै सम्मानप्रदर्शनाय समुत्सुको जातः । सः नौकया जलपथम् अतिक्रम्य मूलभूखण्डं पाम्बन् प्रदेशे अवततार । रामनाथपुरस्य राज्ञा तथा च बहुभिः जनैः सह सः साक्षात्कृतः । स्वामिपादस्य शकटतः अश्वा अपसृताः, स्वयं रामनाथपुरराज्ञा बहुभिः जनैः च शकटं वाहितम् । विजययात्रा नगरात् नगरान्तरं – रामनाथपुरं, मदुरा, कुम्भकोणं बहूनि अन्यानि च स्थानानि स्वामिपादो भ्रमन् नाना जनांश्च मिलितवान् । तस्य उपदेश- द्वारा सनातन धर्मस्य पुनरुज्जीवनं च कृतमासीत्।



Unit 2.indd 11 18-03-2019 12:10:15

## व्याकरण–अभ्यासः - 1

दकारान्तः "अस्मद्" शब्दः, त्रिषु लिङ्गेषु समानरूपः (I)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अहम् | आवाम् | वयम् |
| द्वितीया | माम्, मा | आवाम्, नौ | अस्मान्, नः |
| तृतीया | मया | आवाभ्याम् | अस्माभिः |
| चतुर्थी | मह्यम्, मे | आवाभ्याम्, नौ | अस्मभ्यम्, नः |
| पञ्चमी | मत् | आवाभ्याम् | अस्मत् |
| षष्ठी | मम, मे | आवयोः, नौ | अस्माकम्, नः |
| सप्तमी | मयि | आवयोः | अस्मासु |

दकारान्तः "युष्मद्" शब्दः, त्रिषु लिङ्गेषु समानरूपः (You)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | त्वम् | युवाम् | यूयम् |
| द्वितीया | त्वाम्, त्वा | युवाम्, वाम् | युष्मान्, वः |
| तृतीया | त्वया | युवाभ्याम् | युष्माभिः |
| चतुर्थी | तुभ्यम्, ते | युवाभ्याम्, वाम् | युष्मभ्यम्, वः |
| पञ्चमी | त्वत् | युवाभ्याम् | युष्मत् |
| षष्ठी | तव, ते | युवयोः, वाम् | युष्माकम्, वः |
| सप्तमी | त्वयि | युवयोः | युष्मासु |



Unit 2.indd 12 18-03-2019 12:10:15

# अनुच्छेदलेखनम् –1

## (Comprehension – 1)



कश्चन अजशाबकः नद्यां जलं पिबन् आसीत्। कश्चन वृकः तं दृष्ट्वा आहारार्थं केनापि व्याजेन तं हन्तुम् ऐच्छत् । सः तं मेषपोतं कोपेन एवम् अपृच्छत् - रे धूर्त!, मया पीयमानं जलं कुतः आविलङ्करोषि? इति । अजशिशुः सविनयं प्रत्यवदत् - "भद्र, भवान् उन्नततरे प्रदेशे जलं पिबति। जलं च त्वत्तः मत्समीपं प्रवहति। कथं तव जलं मलिनयितुम् अहं शक्नुयाम् ? " इति । तत वृकः उवाच – "अस्तु, किमर्थं त्वं षण्मासेभ्यः पूर्वं माम् अनिन्दः। तेन अपराधेन इदानीं त्वां हनिष्यामि" इति । अजशाबकः भयेन वेपमानः प्रत्यब्रवीत् । "हन्त ! जातस्य मम मासत्रयमपि न व्यतीतम् । षण्मासेभ्यः प्राक् अहं त्वाम् अनिन्दम् इति कथं संभावनीयम् ? " इति । भृशं कोपाविष्टः वृकः क्रूरेण स्वरेण अजशाबकम् अवदत् - "रे दुष्ट! किमर्थं निर्भयः प्रजल्पसि, यदि त्वं न अनिन्दः नूनं तव पिता तथा अकरोत् । अत्र न कोऽपि विशेषः" इत्युक्त्वा सः मेषपोतस्य उपरि निपत्य तं व्यापादयामास।

प्रश्नाः-

1. कः नद्यां जलं पिबन् आसीत् ?
2. कः अजशाबकं हन्तुम् ऐच्छत् ?
3. वृकः तं दृष्ट्वा किम् अपृच्छत् ?
4. वृकस्य क्रूरवचनात् वेपमानः अजशाबकः किं प्रत्यवदत् ?
5. कोपाविष्टः वृकः किम् अवदत् ?
6. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत ।

## अनुवादः – 1
## (Translation - 1)



कश्चन अन्धयुवकः प्रतिदिनं गुरोः उपदेशार्थं समीपस्थम् आश्रमं गच्छति स्म। एकदा गुरोः प्रवचनं श्रुत्वा सः अन्धः पृष्टवान् – जीवने ज्ञानस्य प्रयोजनं किम्? इति। प्रवचनानन्तरं गुरुः बहिरागतवान्। तदा बहिः महान् अन्धकारः आसीत्। तदा गुरुः अन्धम् अवदत् – भोः बहिः महान् अन्धकारः। अतः दीपं नय इति। अन्धः प्रत्युवाच – "किं प्रयोजनम् एतेन दीपेन। अहं तु अन्धः" इति। गुरुः अवदत् – "एषः दीपः भवते मार्गं न दर्शयति, किन्तु ये जनाः भवतः पुरतः आगच्छन्ति ते मार्गात् अपसरन्ति इति। गुरोः वचनानुसारेण सः अप्रकाशमानम् दीपम् अनयत्। किन्तु मार्गे केनचित् पुरुषेण घट्टनम् अभवत्। तत्क्षणे अन्धयुवकस्य हस्ते स्थितः दीपः अधः अपतत्। अनन्तरदिने युवकः गुरुम् एतां दुरवस्थाम् अवदत्। गुरुः अवदत् – केवलं दीपस्य नयनेन अपि किमपि न प्रयोजनम्। अप्रकाशमानस्य दीपस्य पुरतः आगन्तृभिः कथं दृश्येत ?" अतः अप्रज्वलितः दीपः यथा व्यर्थः स्यात् तथैव ज्ञानस्य ज्योतिः विना जीवनमपि व्यर्थं भवेत् इति।



Unit 2.indd 14 18-03-2019 12:10:15

तृतीयः पाठः 3

# Lesson 3
# प्रकृतिसौन्दर्यम्

महाकविः कालिदासः संस्कृतसाहित्यस्य महाकविषु श्रेष्ठतमं स्थानं बिभर्ति । अस्य मेधाविलासः समग्रविश्वेषु विदिततमः । प्रस्तुतः पाठ्यभागः रघुवंशमहाकाव्यस्य त्रयोदशसर्गात् उद्धृतः । सर्गेऽस्मिन् सीतारामयोः पुष्पकविमानयात्रामधिकृत्य वर्णितम् । अत्र महाकविः प्रकृतिवर्णने सर्वान् अतिशेते । श्रीरामः अयोध्यागमनसमये आकाशात् भूमौ विद्यमानान् मनोहरान् रम्यान् दृश्यान् स्वप्रियभार्यायै सीतायै संप्रदर्शयति ।



## सेतुना विभक्तः सागरः -

वैदेहि पश्यामलयाद्विभक्तं
  मत्सेतुना फेनिलमम्बुराशिम् ।
छायापथेनेव शरत्प्रसन्नम्
  आकाशमाविष्कृतचारुतारम् ।। 1



Unit 3.indd 15 18-03-2019 12:13:04

### अयश्चक्रनिभः सागरः -

दूरादयश्चक्रनिभस्य तन्वी
तमालतालीवनराजिनीला ।
आभाति वेला लवणाम्बुराशेः
धारानिबद्धेव कलङ्करेखा ।। 2

### पुष्पकविमानवर्णनम् -

क्वचित् पथा सञ्चरते सुराणां
क्वचिद्घनानां पततां क्वचिच्च ।
यथाविधो मे मनसोऽभिलाषः
प्रवर्तते पश्य तथा विमानम् ।। 3

### मेघवर्णनम् -

करेण वातायनलम्बितेन
स्पृष्टस्त्वया चण्डि कुतूहलिन्या ।
आमुञ्चतीवाभरणं द्वितीयम्
उद्भिन्नविद्युद्वलयो घनस्ते ।। 4

### अगस्त्यकीर्तिः -

त्रेताग्निधूमाग्रमनिन्द्यकीर्तेः
तस्येदमाक्रान्त विमानमार्गम् ।
घ्रात्वा हविर्गन्धिरजोविमुक्तः
समश्नुते मे लघिमानमात्मा ।। 5

### शरभङ्गप्रशंसा -

छायाविनीताध्वपरिश्रमेषु
भूयिष्ठसम्भाव्यफलेष्वमीषु ।
तस्यातिथीनामधुना सपर्या
स्थिता सुपुत्रेष्विव पादपेषु ।। 6



Unit 3.indd 16 18-03-2019 12:13:04

### मन्दाकिनीप्रशंसा -

एषा प्रसन्नस्तिमितप्रवाहा
सरिद्विदूरान्तरभावतन्वी ।
मन्दाकिनी भाति नगोपकण्ठे
मुक्तावली कण्ठगतेव भूमेः ॥ 7

### सीताप्रशंसा -

तत्रेश्वरेण जगतां प्रलयादिवोर्वीम्
वर्षात्ययेन रुचमभ्रघनादिवेन्दोः ।
रामेण मैथिलसुतां दशकण्ठकृच्छ्रात्
प्रत्युद्धृतां धृतिमतीं भरतो ववन्दे ॥ 8

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. फेनिलम् - foamy
2. आकाशम् - sky
3. अयः - iron
4. छाया - shadow
5. विद्युत् - lightning
6. वेला - sea-shore
7. सपर्या - worship
8. पादपः - tree
9. घनः - cloud
10. मुक्तावली - chain of pearls

### II. अधो निर्दिष्टानां पदानां विपरीतपदानि लिखत-

1. अवद्यम् × अनवद्यम्
2. शुभ्रा × मलिना
3. दूरे × अन्तिके
4. निन्द्या × वन्द्या
5. प्रभा × अन्धकारः
6. सुपुत्रः × कुपुत्रः
7. सुरः × असुरः
8. प्रसन्नः × अप्रसन्नः
9. कलङ्कः × निष्कलङ्कः

## III. अधो विद्यमानानां पदानां व्याकरणरूपं लिखत-

1. आभाति - लट् लकारः, प्रथमपुरुषः, एकवचनम् of भा with आ to shine
2. आमुञ्चति – लट् लकारः, प्रथमपुरुषः, एकवचनम् of मुञ्च् with आ to leave
3. पश्य – लोट् लकारः, मध्यमपुरुषः, एकवचनम् of दृश् to see
4. स्थिता – क्त प्रत्ययान्तः meaning stay
5. अधुना – अव्ययम्, meaning now

## IV. यथोचितं सन्धिम् अथवा सन्धिविच्छेदं कुरुत-

| | | | |
|---|---|---|---|
| 1. | पथेनेव | - | पथेन + इव |
| 2. | सुपुत्रेष्विव | - | सुपुत्रेषु + इव |
| 3. | लवणाम्बुराशेः | - | लवण + अम्बुराशेः |
| 4. | घनस्ते | - | घनः + ते |
| 5. | तस्यातिथीनाम् | - | तस्य + अतिथीनाम् |
| 6. | कण्ठगतेव | - | कण्ठगता + इव |
| 7. | निबद्धेव | - | निबद्धा + इव |
| 8. | आमुञ्चतीव | - | आमुञ्चति + इव |
| 9. | फलेष्वमीषु | - | फलेषु + अमीषु |

## V. अधो लिखितानां पदानां विग्रहं लिखत-

| | | | |
|---|---|---|---|
| 1. | शरत्प्रसन्नम् | - | शरदि प्रसन्नम् । |
| 2. | मैथिलसुताम् | - | मिथिलायाः अयं (राजा) मैथिलः,तस्य सुता, ताम् । |
| 3. | रजोविमुक्तः | - | रजसः विमुक्तः । |
| 4. | पादपेषु | - | पादैः पिबन्ति इति पादपाः, तेषु । |

## VI. अधः प्रदत्तानां शब्दानां समानार्थकं पदं लिखत-

| | | | | | |
|---|---|---|---|---|---|
| 1. अम्बुराशिः | - | समुद्रः | 2. पादपः | - | तरुः |
| 3. पर्वतः | - | शैलः | 4. वनम् | - | काननम् |
| 5. सपर्या | - | पूजा | | | |



Unit 3.indd 18 18-03-2019 12:13:05

## VII. समीचीनम् उत्तरं चिनुत-

1. विदेहदेशस्य राजपुत्र्याः नाम _______

   (i) वैदेही (ii) विदेहा (iii) वैदेहा

2. सागरः अनेन विभक्तः _______

   (i) अम्बुराशिना (ii) सेतुना (iii) छायापथेन

3. सीतया कुतूहलेन कः स्पृष्टः ?

   (i) घनः (ii) विमानम् (iii) आकाशम्

4. कस्य वेला धारानिबद्धेव आभाति ?

   (i) लवणाम्बुराशेः (ii) मधुराम्बुराशेः (iii) कट्वम्बुराशेः

5. का भूमेः मुक्तावली इव भाति ?

   (i) नर्मदा (ii) सिन्धु (iii) मन्दाकिनी

6. का धृतिमतिः?

   (i) उर्वी (ii) मैथिलसुता (iii) कैकेयी

7. केषां सपर्या सुपुत्रेष्विव स्थिता ?

   (i) पितॄणाम् (ii) बान्धवानाम् (iii) अतिथीनाम्

## VIII. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम् -

1. समुद्रः कथं केन विभक्तः?
2. समुद्रस्य वेला कथम् आभाति?
3. उद्भिन्नविद्युद्वलयः कः ?
4. अतिथीनां सपर्या कथं स्थिता ?
5. मन्दाकिनी कथं भाति ?

## IX. अधो दत्तानां प्रश्नानां सविस्तरमुत्तरं लिखत -

1. महाकविकालिदासेन प्रकृतेः शोभा कथं वर्णिता इति त्रिचतुर्षु श्लोकेषु व्याख्यात ।
2. रामः सीतायै दर्शितं प्रकृतिसौन्दर्यं श्लोकत्रयेण विवृणुत।

***********



Unit 3.indd 19 18-03-2019 12:13:05

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

कालिदासः संस्कृतकाव्यपरम्परायां महाकविः वर्तते । सः कविकुलगुरुः इति प्रसिद्धः। पाश्चात्याः विदुषः अमुं भारतीय-शेक्स्पीयर् इति प्रशंसन्ति । सः विक्रमादित्यसभायां पण्डितनवरत्नेषु अन्यतमः आसीत् । अयं काश्मीरे जनिं

प्राप्य उज्जियिन्यां स्वजीवनं यापितवान् इति पण्डिताः वदन्ति । अयं रघुवंशम्, कुमारसंभवम्, मेघदूतम्, ऋतुसंहारः इति श्रव्यकाव्यानि, मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम् इति दृश्यकाव्यानि (नाटकानि) च अरचयत् । अयम् उपमालङ्कारप्रयोगे अतीव निपुणः आसीत्। अत एवोच्यते “उपमा कालिदासस्य” इति।

स्थितः ककुद्मानिव तीक्ष्णशृङ्गः<br>
महाचलः श्वेत इवोच्चशृङ्गः ।<br>
हस्तीव जाम्बूनदबद्धशृङ्गः<br>
रराज चन्द्रः परिपूर्णशृङ्गः ।।

विनष्टशीताम्बुतुषारपङ्को<br>
महाग्रहग्राहविनष्टपङ्कः ।<br>
प्रकाशलक्ष्म्याश्रयनिर्मलाङ्को<br>
रराज चन्द्रो भगवान् शशाङ्कः ।।

शिलातलं प्राप्य यथा मृगेन्द्रो<br>
महारणं प्राप्य यथा गजेन्द्रः ।<br>
राज्यं समासाद्य यथा नरेन्द्रः<br>
तथा प्रकाशो विरराज चन्द्रः ।।

### Weblinks :

1. https://en.m.wikipedic.org/wiki/mahakavya
2. https://en.m.wikipedic.org/wiki/khandakavya
3. https://en.m.wikipedic.org/wiki/campukavya
4. https://en.m.wikipedic.org/wiki/didacticpoetry



Unit 3.indd 20 18-03-2019 12:13:05

चतुर्थः पाठः 4

Lesson 4

# शिक्षापरीक्षा

पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परिक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः ॥

विश्वे महाकविकालिदासस्य रचनाः जनान् आकर्षयन्ति। विशिष्य स्वनाटकेषु सर्वेषां पात्राणां चित्रणम् अतीव चमत्कारतया चित्रितम् अस्ति। अयं पाठ्यभागः कालिदासेन विरचितात् मालविकाग्निमित्रम् इति नाटकात् स्वीकृतः। पञ्चाङ्कयुक्ते नाटकेऽस्मिन् मालविकाग्निमित्रयोः वृत्तान्तः वर्णितः अस्ति। प्रकृते नाट्याचार्यस्य गणदासस्य उपदेशपरीक्षा शिष्यायाः मालविकायाः नाट्यप्रयोगः च पाठ्यविषयत्वेन स्वीकृतः विद्यते।



देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषं
रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा।
त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते
नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम् ॥



Unit 4.indd 21 18-03-2019 12:15:22

(ततः प्रविशति राजा, विदूषकः, कञ्चुकी च )

कञ्चुकी - देव, अभिनयाचार्यौ हरदत्तगणदासौ त्वां द्रष्टुमिच्छतः।

राजा - प्रवेशय तौ।

उभौ - (राजानमुपसृत्य) विजयतां देवः।

राजा - स्वागतं भवद्भ्याम्। किमिदं शिष्योपदेशकाले युगपदाचार्ययोः उपस्थानम्?

गणदासः - देव, अहम् अमुना हरदत्तेन प्रधानपुरुषसमक्षम् 'अयं न मे पादरजसापि तुल्य' इति अधिक्षिप्तः।

हरदत्तः - देव, अयमेव मयि प्रथमं परिवादकरः। अत्रभवतः किल मम च समुद्रपल्वलयोरिव अन्तरमिति। तदत्रभवान् इमं मां च शास्त्रेप्रयोगे विमृशतु। देव एव नौ विशेषज्ञः प्राश्निकः।

गणदासः - अवहितो देवः श्रोतुमर्हति।

राजा - तिष्ठतु तावत्। पक्षपातमत्र देवी मन्यते। तदस्याः पण्डितकौशिकीसहितायाः समक्षमेव न्याय्यो व्यवहारः।

विदूषकः - सुष्ठु भवान् भणति।

राजा - (कञ्चुकीं विलोक्य) अमुं प्रस्तावं निवेद्य पण्डितकौशिक्या सार्धम् आहूयतां देवी।

कञ्चुकी - यदाज्ञापयति देवः। (इति निष्क्रम्य सपरिव्राजिकया देव्या च सह पुनः प्रविश्य) इत इतो भवती।

परिव्राजिका - (उपसृत्य) विजयतां देवः।

राजा - भगवति अभिवादये।

परिव्राजिका - शरच्छतं भव।

देवी - जयतु आर्यपुत्रः।

राजा - स्वागतं देव्यै। (परिव्राजिकां विलोक्य) भगवति क्रियताम् आसनपरिग्रहः।



Unit 4.indd 22 18-03-2019 12:15:22

(सर्वे यथार्हमुपविशन्ति )

राजा - भगवति अत्रभवतोः हरदत्तगणदासयोः परस्परविज्ञानसंघर्षो जातः। तदत्र भवत्या प्राश्निकपदम् अध्यासितव्यम् ।

परिव्राजिका - (सस्मितम्) अलमलम् उपालम्भेन। "पत्तने विद्यमानेऽपि ग्रामे रत्नपरीक्षा" ।

राजा - मा मैवम् । पण्डितकौशिकी खलु भगवती । पक्षपातिनौ अनयोः हरदत्तगणदासयोः अहं देवी च ।

आचार्यौ - सम्यगाह देवः । मध्यस्था भगवती गुणदोषौ नः परिच्छेत्तुमर्हति ।

राजा - तेन हि प्रस्तूयतां विवादः ।

परिव्राजिका - देव, प्रयोगप्रधानं हि नाट्यशास्त्रम् । किमत्र वाग्व्यवहारेण?

राजा - कथं वा देवी मन्यते?

देवी - यदि मां पृच्छसि, एतयोर्विवाद एव न मे रोचते ।

गणदासः - न मां देवी समानविद्यतः परिभवनीयम् अनुमन्तुर्महति ।

विदूषकः - देवि, पश्याम उरभ्रसंवादम् । किं मुधा वेतनदानेन?

देवी - ननु कलहप्रियोऽसि ।

विदूषकः - मा तावत् । अन्योन्यकलहितयोः मत्तहस्तिनोः एकतरस्मिन् न निर्जिते कुत उपशमः ?

राजा - ननु स्वाङ्गसौष्ठवाभिनयम् उभयोर्दृष्टवती भगवति ।

परिव्राजिका - अथ किम् ?

राजा - तदिदानीमतः परं किम् आभ्यां प्रत्याययितव्यम्?

परिव्राजिका - तदेव वक्तुकामास्मि ।

श्लिष्टा क्रिया कस्यचिदात्मसंस्था संक्रान्तिरन्यस्य विशेषयुक्ता ।
यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव ।।

विदूषकः - श्रुतं भगवत्या वचनम् आर्याभ्याम् । एष पिण्डितार्थः उपदेशदर्शनेन निर्णय इति ।

आचार्यौ - परमुचितं नः ।

परिव्राजिका - देव, उभयोः प्रयोगं पश्यामः । तावता ज्ञायत एव अत्र भवतोः उपदेशान्तरम्।

आचार्यौ - यदाज्ञापयति भगवती ।



Unit 4.indd 23 18-03-2019 12:15:22

(सर्वे निष्क्रान्ताः)

(ततः प्रविशन्ति सवयस्यः राजा, धारिणी, परिव्राजिकादि जनाः)

राजा - भगवति, अत्रभवतोः आर्ययोः कतरस्य प्रथमम् उपदेशं द्रक्ष्यामः।

परिव्राजिका - ननु समानेऽपि ज्ञानवृद्धभावे वयोवृद्धत्वात् गणदासः पुरस्कारमर्हति।

गणदासः - देव, मालविकायाः नाट्यप्रयोगं द्रष्टुमर्हति।

राजा - भवतु।

(मालाविका नृत्यति)

गणदासः - भगवति, यथादृष्टमभिधीयताम्। गुणो वा दोषो वा।

परिव्राजिका - यथादर्शनं सर्वमनवद्यम्।

गणदासः - देवः कथं वा मन्यते।

राजा - वयं स्वपक्षे शिथिलाभिमानाः संवृत्ताः।

देवी - दिष्ट्या परीक्षकाराधनेन अधिकं वर्धत आर्यः।

गणदासः - देवीपरिग्रहश्च मे वृद्धिहेतुः।

(मालविका सहाचार्येण निष्क्रान्ता)

कविपरिचयः

महाकविकालिदासस्य स्थानं समग्रे विश्वे सर्वातिशयत्वेन विद्यते। काल्याः दासोऽयं स्वरचनासामर्थ्यात् सर्वानपि सहृदयान् स्वदासं करोति। अस्य कालः विक्रमपूर्वद्वादशशतकमारभ्य विक्रमानन्तरषष्ठशतकपर्यन्तमिति समालोचकाः मन्यन्ते। अनेन महाकविना रघुवंशम्, कुमारसम्भवम्, मेघदूतम्, ऋतुसंहारः इति श्रव्यकाव्यानि, मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम् इति नाटकानि च विरचितानि। मालविकाग्निमित्रमेव अस्य प्रथमा कृतिः।

## अभ्यासः

### I. कठिनशब्दार्थः-

1. आमनन्ति - deem
2. समाराधनम् - source of pleasure



Unit 4.indd 24 18-03-2019 12:15:22

3. अभिनयाचार्यौ - two dance teachers

4. उपस्थानम् - arrival

5. समक्षम् - in the presence of

6. रजसा - to the dust on

7. अधिक्षिप्तः - abused

8. पल्वलः - puddle

9. अन्तरम् - difference

10. प्राश्निकः - examiner

11. प्रस्तावम् - matter / incident

12. सार्धम् - together with

13. शरच्छतम् - hundred years

14. संघर्षः - dispute

15. अध्यासितव्यम् - be occupied

16. उपालम्भेन - by mockery

17. परिभवनीयम् - to speak ill

18. मुधा - vain

19. वेतनम् - pay/ salary

20. उपशमः - peace

21. प्रत्याययितव्यम् - expected to give

22. धुरि - in front

24. अनवद्यम् - faultless



Unit 4.indd 25 18-03-2019 12:15:22

## II. समीचीनमुत्तरं चिनुत-

1. मालविकाग्निमित्रम् इति ----- भवति।

   (i) नाटकम्　　(ii) आख्यायिका　　(iii) प्रकरणम्

2. मालविकाग्निमित्रे अङ्काः सन्ति -----

   (i) सप्त　　(ii) नव　　(iii) पञ्च

3. भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम् -----

   (i) नाट्यम्　　(ii) कथाश्रवणम्　　(iii) काव्यपठनम्

4. समुद्रशब्दस्य पर्यायः -----

   (i) तडागः　　(ii) सागरः　　(iii) कूपः

5. परस्परविज्ञानसंघर्षः कयोः जातः?

   (i) राजाविदूषकयोः　　(ii) देवीराज्ञोः　　(iii) हरदत्तगणदासयोः

6. प्राश्निकपदम् अध्यास्ते -----

   (i) परिव्राजिका　　(ii) राजा　　(iii) देवी

7. पण्डितकौशिकी भवति एषा -----

   (i) देवी　　(ii) मालविका　　(iii) परिव्राजिका

8. यस्योभयं साधु स ----- धुरि प्रतिष्ठापयितव्यः

   (i) छात्राणाम्　　(ii) शिक्षकाणाम्　　(iii) जनानाम्

9. सभायां प्रयोगं प्रदर्शयति एषा -----

   (i) देवी　　(ii) परिव्राजिका　　(iii) मालविका

10. राज्ञः अग्निमित्रस्य वयस्यः भवति -----

   (i) विदूषकः　　(ii) कञ्चुकी　　(iii) गणदासः

## III. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. मालविकाग्निमित्रं केन विरचितम् ?
2. जनस्य एकं समाराधनं किं भवति?
3. अभिनयाचार्यौ कौ?



Unit 4.indd 26　　18-03-2019 12:15:22

4. गणदासः केन अधिक्षिप्तः?

5. परिव्राजिका किं पदम् अध्यास्ते?

6. हरदत्तगणदासयोः कीदृशः संघर्षः जातः?

7. नाट्यशास्त्रं कीदृशं भवति?

8. कः शिक्षकाणां धुरि प्रतिष्ठापयितव्यः?

9. ज्ञानवृद्धभावे वयोवृद्धः कः?

10. का नाट्यप्रयोगं करोति?

## IV. सविस्तरम् उत्तरं लिखत-

1. शिक्षापरीक्षा इति पाठं संक्षिप्य स्वभाषया लिखत।
2. मालविकाग्निमित्रात् स्वीकृतं पाठ्यांशं यथामति विवृणुत।

## V. रिक्तस्थानानि पूरयत-

1. त्रैगुण्योद्भवमत्र लोकचरितं ___________ दृश्यते।
2. अभिनयाचार्यौ ___________ द्रष्टुमिच्छतः।
3. ___________ कस्यचिदात्मसंस्था।
4. पत्तने विद्यमानेऽपि ___________ रत्नपरीक्षा।
5. वयं स्वपक्षे ___________ संवृत्ताः।

## VI. कः कं प्रति वदति इति लिखत –

| | | कः | कं |
|---|---|---|---|
| 1. | पक्षपातमत्र देवी मन्यते | ________ | ________ |
| 2. | पत्तने विद्यमानेऽपि ग्रामे रत्नपरीक्षा | ________ | ________ |
| 3. | ननु कलहप्रियोऽसि | ________ | ________ |
| 4. | यथादर्शनं सर्वमनवद्यम् | ________ | ________ |
| 5. | देवीपरिग्रहश्च मे वृद्धिहेतुः | ________ | ________ |

***********

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

### कथाविस्तृतिः

मालविकाग्निमित्रमिदं नाटकं कालिदासस्य प्रथमकृतित्वेन प्रसिद्धम् । अत्र पञ्च अङ्काः सन्ति ।

अस्मिन् नाटके शुङ्गवंश्यः युवराजः अग्निमित्रः नायकः, नायिका च विदर्भराजकन्या मालविका ।

ईसवीयशताब्द्याः पूर्वं विदिशानगर्यां सेनापतेः पुष्यमित्रस्य आत्मजः महाराजः अग्निमित्रः राज्यं शशास । अस्य धारिणी, इरावती इति नाम्न्यौ पत्न्यौ आस्ताम् ।

विदर्भदेशस्य राजा माधवसेनः स्वभगिनीं मालविकाम् अग्निमित्राय दातुम् (विवाहार्थं) इष्टवान् । मध्ये यज्ञसेनः माधवसेनं विजित्य राज्यमवाप । अग्निमित्रेण सह विरोधमपि कृतवान्।

ततः माधवसेनं बन्धनं कृत्वा कारागृहे अस्थापयत् । अस्मिन् समये माधवसेनस्य मन्त्री सुमतिः तस्य इच्छायाः पूर्तये मालविकया तथा स्वभगिन्या कौशिक्या सह राजधान्याः बहिरागत्य विदिशानगरं गन्तुमुद्युक्तः आसीत् ।

पश्चात् मध्येमार्गं दस्यूनां सैन्यमाविरभूत्। तत्पश्चात् अस्य सैन्यरक्षकारागत्य चौरैः पराभूताः । किन्तु तत्र व्यसने सुमतिः दस्युभिः मृतवान् ।

तस्मिन्नेव युद्धे कौशिकी मूर्च्छाम् अप्राप्नोत् । ततः जागरणं प्राप्तया तया मालविका दुर्लभदर्शना सञ्जाता । ततः सुमतेः शवं दग्ध्वं विज्ञाय क्लेशेन अग्निमित्रदेशमवतीर्य काषायवस्त्रं गृहीत्वा परिव्राजिकापदवीं प्राप ।

मालविका तु वनचारिभ्यः अग्निमित्रस्य अमात्यं वीरसेनं प्राप्ता सती धारिणीपार्श्वमागत्य प्रेष्यभावं सञ्जाता ।

वीरसेनस्तु मालविकायाः सङ्गीताभिरुचिं ज्ञात्वैव धारिण्याः निकटे सङ्गीताभ्यासार्थं प्रेषितवान्। धारिण्यपि तस्याः कलापटुत्वं दृष्ट्वा प्रसन्ना सती नाट्याचार्यस्य गणदासस्य कृते शिक्षाप्राप्त्यर्थं व्यवस्थां च कृतवती ।

कौशिकी तावत् मालविकां जानात्यपि कस्मादपि विशेषकारणात् तस्याः परिचयं न दत्तवती ।



Unit 4.indd 28 18-03-2019 12:15:23

एकदा धारिणी स्वस्य प्रत्यग्रवर्णरागां चित्रलेखां पश्यन्ती भवति। तदा महाराजः आलेख्ये चित्रितां अपूर्वां सुन्दरीं विलोक्य का सा? किं नामधेया च इति पुनः पुनः पृच्छति। तदा अनुत्तरे राज्ञि तस्याः पञ्चवर्षीया पुत्री वसुलक्ष्मी `मालविका' इति कथयति। ततः तस्मात् मालविकां गोप्तुं धारिणी यतते।

मालविकायाम् अनुरक्तः राजा मेलनसन्दर्भाय विदूषकं त्वरयति। तदा हरदत्तगणदासयोः विवादोपायेन मालविकां द्रष्टुं निर्णयं करोति। तदनन्तरं परिव्राजिका कौशिकी आचार्ययोः विवादे उभयोः शिष्यस्य प्रयोगदर्शनमावश्यकमिति निर्णीतवती। तन्निरोधाय कृता देव्याः प्रयत्नम् असाफल्यं जातम्।

ततः गणदासस्य कौशलं परीक्षते। तदा मालविका नृत्यं करोति। तदनन्तरं हरदत्तस्य परीक्षारम्भे भोजनवेला आगच्छति। तदा सर्वे गच्छन्ति।

ततः अकाले अशोकवृक्षदोहनाय नूपुरयुक्तचरणेन ताडितुं धारिणी (पादपीडाकारणात्) मालविकां नियुङ्क्ते। तदा राज्ञी अशोकवटवृक्षे पञ्चदिनानन्तरं पुष्पाणि यदि समागच्छेयुः तर्हि अवश्यं मालविकायाः मनोरथं पूरयिष्ये इति शपथं करोति।

मालविका अपि तत्रागत्य वकुलावलिकां दृष्ट्वा राजानं कामये इति वदति। तदा अकस्मात् आगतः राजा तज्ज्ञात्वा प्रेमवर्णनं करोति।

ततः इरावत्याः चेटी निपुणिका राजा मालविकां द्रष्टुम् अशोकवनं गता इत्युक्त्वा तां नयति। पश्चात् इरावतीं दृष्ट्वा मालविकावकुलावलिके क्षमां याचेते। इरावती उभे कारावासे स्थापयति। पश्चात् धारिण्याः मुद्राङ्कदर्शनेन ततः विमोचयति विदूषकः।

अन्ते अशोकपुष्पोद्गमः सञ्जातः। धारिणी मालविकां विवाहवेषं धृत्वा आगन्तुम् आदिशति। पश्चात् विदर्भात् आगते शिल्पकारिके आगत्य मालविकापरिचयं ददतुः। पारिव्राजिका अपि सर्वं वृत्तान्तं कथयति। धारिणी राज्ञे मालविकाम् अर्पयति॥



Unit 4.indd 29 18-03-2019 12:15:24

## व्याकरण–अभ्यासः - 2

धातुः - परस्मैपदी - लोट् (Imperative mode)

भू (भव्) to be

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भवतु | भवताम् | भवन्तु |
| मध्यमपुरुषः | भव | भवतम् | भवत |
| उत्तमपुरुषः | भवानि | भवाव | भवाम |

अस् – to be

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अस्तु | स्ताम् | सन्तु |
| मध्यमपुरुषः | एधि | स्तम् | स्त |
| उत्तमपुरुषः | असानि | असाव | असाम |

कृ (कर्) – to do

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | करोतु | कुरुताम् | कुर्वन्तु |
| मध्यमपुरुषः | कुरु | कुरुतम् | कुरुत |
| उत्तमपुरुषः | करवाणि | करवाव | करवाम |

वद् – to speak

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वदतु | वदताम् | वदन्तु |
| मध्यमपुरुषः | वद | वदतम् | वदत |
| उत्तमपुरुषः | वदानि | वदाव | वदाम |

पठ् – to read

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठतु | पठताम् | पठन्तु |
| मध्यमपुरुषः | पठ | पठतम् | पठत |
| उत्तमपुरुषः | पठानि | पठाव | पठाम |



Unit 4.indd 30 18-03-2019 12:15:24

## अनुच्छेदलेखनम् – 2

## (Comprehension – 2)



कश्चन वृद्धः स्वस्य उद्याने आम्रवृक्षान् संरोपयितुं महान्तम् उद्यमं कुर्वन् आसीत् । कश्चन युवा तं दृष्ट्वा परिहसन् अपृच्छत् - "अहो अतीव व्यर्थाः तव प्रयासाः । सुतरां वृद्धः त्वं किम् एतेषां वृक्षाणां फलानि आस्वादयितुं जीविष्यसि" इति । वृद्धस्तु निराकुलः चक्षुषी उद्धृत्य तं युवानम् आलोक्य अवदत्- "वत्स, उचितः प्रश्नः त्वया कृतः । मम जननात् पूर्वं यः कोऽपि उद्याने महतः फलवृक्षान् संरोपयामास । तेषां मधुराणि फलानि तु मया भक्ष्यन्ते । तथैव मयि मृते, त्वादृशाः युवानः एतेषां फलानि भक्षयन्तु इति विचिन्त्य अहम् एतान् पादपान् इदानीं संरोपयामि" इति । एतत् श्रुत्वा सः लज्जितः सन् वृद्धस्य विवेकं प्रशशंस ।

नीतिः - "अन्यैः कृतस्य उपकारस्य फलम् अनुभवद्भिः अस्माभिः क्रमेण परेषां हिताय उद्यमः कर्तव्यः एव" ।

प्रश्नाः-

1. कः आम्रवृक्षान् संरोपयति स्म ?
2. युवा वृद्धं प्रति किम् अपृच्छत् ?
3. वृद्धस्य वचनं श्रुत्वा बालकः कथं बभूव ?
4. आम्रफलानि कीदृशानि ?
5. युवा कस्य विवेकं प्रशशंस ?
6. अस्याः कथायाः नीतिः का ?



Unit 4.indd 31 18-03-2019 12:15:24

## अनुवादः – 2 (Translation - 2)



कस्यचित् राज्ञः समीपे द्वौ आश्रितौ आस्ताम् । एकः रामः, अन्यः कृष्णः च इति । प्रभुः तौ दयया रक्षन्नभूत् । सः कदाचित् उभौ आहूय आह – युवां कस्य बलेन जीवथः ? इति । तदा रामः आह-प्रभो, अहं तव कृपाबलेन जीवामि । कृष्णः तु, "दैवबलेन अहं जीवामि" इति उत्तरं दत्तवान् । राजा तु तत्वजिज्ञासया कस्मिंश्चित् कूष्माण्डे बिलं कृत्वा तत् मुक्ताफलैः आपूर्य, तद्रन्ध्रमाच्छाद्य रामाय अदात्। कृष्णाय पादरूप्यं ददौ । रामः स्वीयं फलम् समीचीनं मन्वानः कृष्णं प्रति एवम् आह – मद्गृहे अनेकानि कूष्माण्डफलानि सन्ति । तस्मात् इदं यस्मै कस्मै वा विक्रेतुम् इच्छामि, त्वम् इच्छसि चेत्, तद् गृहीत्वा तत्पादरूप्यं ददातु" इति। तद्वचनम् आकर्ण्य कृष्णः पादरूप्यं दत्वा तत्फलं प्रतिगृहीतवान्। अनन्तरं कृष्णः गृहं गत्वा तत्फलं भित्वा तत्र मुक्तास्समालोक्य विस्मयः आसीत् । दैवदत्तम् इति मत्वा, राज्ञे सर्वं वृत्तान्तं निवेदयामास ।।



Unit 4.indd 32 18-03-2019 12:15:24

पञ्चमः पाठः 5

Lesson 5

# रसपद्यानि

संस्कृतवाङ्मये अनेके कवयः अनेके ग्रन्थाः च सन्ति। तान् सर्वानपि यद्यपि पठितुं ज्ञातुं च इच्छा अस्ति, तथापि यत् सारभूतं तदेव ग्राह्यम् उचितं भवति। संस्कृतवाङ्मयस्य नीतिबोधकानि सुभाषितानि, श्लेषभरिताः श्लोकाः, सरसाः समस्याः, कूटानि, प्रहेलिकादयः च व्यवहारचातुर्यं बोधयन्ति।

अस्मिन् पाठे केषाञ्चन कवीनां रसमयानि पद्यानि विविधेभ्यः ग्रन्थेभ्यः सङ्गृह्य अत्र प्रदत्तानि सन्ति। अनेन मानवाः विवेकिनः भवेयुः इति निश्चप्रचम्।

युधिष्ठिरः कस्य पुत्रो गङ्गा वहति कीदृशी।
हंसस्य शोभा का वास्ति धर्मस्य त्वरिता गतिः॥ 1



का पाण्डुपत्नी गृहभूषणं किं
को रामशत्रुः किमगस्त्यजन्म।
कः सूर्यपुत्रो विपरीतपृच्छा
कुन्तीसुतारावणकुम्भकर्णाः॥ 2





Unit 5.indd 33 18-03-2019 12:19:49



किमिच्छति नरः काश्यां भूपानां को रणे हितः ।
को वन्द्यः सर्वदेवानां दीयताम् एकमुत्तरम् ।। 3



राज्ञः संबोधनं किं स्यात् सुग्रीवस्य तु का प्रिया ।
अधनास्तु किमिच्छन्ति आर्तैः किं क्रियते वद ।। 4



अस्थि नास्ति शिरो नास्ति बाहुरस्ति निरङ्गुलिः ।
नास्ति पादद्वयं गाढम् अङ्गमालिङ्गति स्वयम् ।। 5



Unit 5.indd 34 18-03-2019 12:19:49



अपदो दूरगामी च साक्षरो न च पण्डितः ।
अमुखः स्फुटवक्ता च यो जानाति स पण्डितः ।। 6



कं संजघान कृष्णः का शीतलवाहिनी गङ्गा ।
के दारपोषणरताः कं बलवन्तं न बाधते शीतम् ।। 7



क्षोणी कं सहते करोति दिवि का नृत्यं शिवायाः पतिः
भूतानां कमयुङ्क्त जीवहरणे का रामशत्रोः पुरी ।
कं रक्षन्ति च साधवः पशुपतेः किं वाहनं प्रोच्यताम्
आलोमप्रतिलोमशास्त्रचतुरैरेकं द्वयोरुत्तरम् ।। 8

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. शोभा - beauty
2. त्वरिता - quick
3. वन्द्यः - adorable



Unit 5.indd 35 18-03-2019 12:19:50

| | | | |
|---|---|---|---|
| 4. | आर्तः | - | sick |
| 5. | अस्थि | - | bone |
| 6. | युतकम् | - | shirt |
| 7. | गाढम् | - | tightly |
| 8. | केदारः | - | field |
| 9. | कालः | - | Yama (God of death) |
| 10. | बाहुः | - | shoulder |

## II. अधो निर्दिष्टानां पदानां विपरीतपदानि लिखत-

1. धर्मः × अधर्मः
2. त्वरिता × मन्दा
3. जन्म × मरणम्
4. वन्द्यः × निन्द्यः
5. हितः × अहितः
6. साक्षरः × निरक्षरः
7. पण्डितः × मूर्खः
8. दूरम् × समीपम्
9. स्फुटम् × अस्फुटम्
10. शत्रुः × मित्रम्

## III. अधो विद्यमानानां पदानां व्याकरणरूपं लिखत-

1. वहति – लट् लकारः, प्रथमपुरुषः, एकवचनम् of वह् to flow
2. स्यात् – विधिलिङ्, प्रथमपुरुषः, एकवचनम् of अस् to be
3. इच्छति – लट् लकारः, प्रथमपुरुषः, एकवचनम् of इच्छ् to like
4. सहते – लट् लकारः, आत्मनेपदी, प्रथमपुरुषः, एकवचनम् of सह्, to tolerate 6
5. करोति – लट् लकारः प्रथमपुरुषः, एकवचनम्, of कृ (कर्) to do
6. जानाति – लट् लकारः, प्रथमपुरुषः, एकवचम् of ज्ञा to know
7. स्युः – विधिलिङ्, प्रथमपुरुषः, बहुवचनम् of अस् to be
8. रक्षन्ति – लट् लकारः, प्रथमपुरुषः, बहुवचनम् of रक्ष् to protect



Unit 5.indd 36 18-03-2019 12:19:50

## IV. यथोचितं सन्धिम् अथवा सन्धिविच्छेदं कुरुत-

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| 1. वास्ति | = | वा | + अस्ति | | 2. अधनास्तु | = | अधनाः | + तु |
| 3. प्रोच्यताम् | = | प्र | + उच्यताम् | | 4. द्वयोरुत्तरम् | = | द्वयोः | + उत्तरम् |
| 5. नास्ति | = | न | + अस्ति | | 6. किमिच्छन्ति | = | किम् | + इच्छन्ति |
| 7. बाहुरस्ति | = | बाहुः | + अस्ति | | 8. शास्त्रचतुरैरेकम् | = | शास्त्रचतुरैः | + एकम् |

## V. अधोलिखितानां पदानां विग्रहं लिखत-

1. पाण्डुपत्नी = पाण्डोः पत्नी ।
2. सूर्यपुत्रः = सूर्यस्य पुत्रः ।
3. रामशत्रुः = रामस्य शत्रुः ।
4. अधनाः = न विद्यते धनं येषां ते ।
5. सर्वदेवानां = सर्वे च ते देवाः तेषाम् ।
6. आमुखः = न विद्यते मुखं यस्य सः ।
7. दारपोषणरताः = दारपोषणे रताः ।
8. जीवहरणे = जीवस्य हरणम्, तस्मिन् ।
9. पशुपतेः = पशूनां पतिः, तस्य ।
10. साक्षरः = अक्षरेण सह वर्तते इति ।

## VI. अधः प्रदत्तानां शब्दानां समानार्थकं पदं लिखत-

| | | | | | |
|---|---|---|---|---|---|
| 1. हंसः | – | मरालः | 2. गतिः | – | गमनम् |
| 3. भूषणम् | – | आभरणम् | 4. शत्रुः | – | रिपुः |
| 5. राजा | – | नृपतिः | 6. नरः | – | मनुष्यः |
| 7. चक्षुः | – | नयनम् | 8. गङ्गा | – | मन्दाकिनी |
| 9. दाराः | – | भार्याः | 10. पतिः | – | भर्ता |

## VII. समीचीनम् उत्तरं चिनुत-

1. धर्मस्य पुत्रः कः?
   (i) भीमः (ii) युधिष्ठिरः (iii) अर्जुनः
2. रामस्य शत्रुः कः?
   (i) रावणः (ii) लक्ष्मणः (iii) विभीषणः

3. का पाण्डुपत्नी ?

(i) कुन्ती (ii) मीरा (iii) तारा

4. कः रणे हितः?

(i) जयः (ii) पराजयः (iii) अजयः

5. अपदो दूरगामी च – प्रहेलिकायाः उत्तरं किम्?

(i) ii) चित्रम् (iii) पत्रम्

6. कृष्णः कं जघान ?

(i) कंसं (ii) अंसं (iii) वंशं

7. किं गाढम् अङ्गम् आलिङ्गति?

(i) विश्वम् (ii) करवस्त्रम् (iii) युतकम्

8. क्षोणी कं सहते ?

(i) सारं (ii) हारं (iii) भारं

9. नंदी कस्य वाहनम्?

(i) सभापतेः (ii) पशुपतेः (iii) श्रीपतेः

10. रावणस्य पुरी का?

(i) लङ्का (ii) शङ्का (iii) गङ्गा

## VIII. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. हंसस्य का शोभा अस्ति?
2. कुन्ती कस्य पत्नी ?
3. नरः कुत्र मृत्युम् इच्छति ?
4. अधनाः किम् इच्छन्ति ?
5. कैः देवताराधनं क्रियते ?
6. कं शीतं न बाधते ?
7. युतकस्य किं किं नास्ति ?
8. साधवः कं रक्षन्ति ? पशुपतेः च किम् वाहनम् ?

## IX. सविस्तरम् उत्तरत-

1. रसपद्यानि पाठात् त्रीणि पद्यानि व्याख्यात।
2. यथेच्छं तिस्रः प्रहेलिकाः सोत्तरं विवृणुत।

***********



Unit 5.indd 38 18-03-2019 12:19:50

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

"विदग्धमुखमण्डनम्" इति ग्रन्थे प्रहेलिकायाः लक्षणम् -

"व्यक्तीकृत्य कमप्यर्थम् स्वरूपार्थस्य गोपनात् ।
यत्र बाह्याभ्यान्तरावर्थौ कथ्येते सा प्रहेलिका॥"

सा च शाब्दी, आर्थी चेति द्विविधा भवति । कविर्दण्डी षोडश प्रकाराः प्रहेलिकाः सन्ति इति निरूपयामास ।

सुभाषितरत्नभाण्डागारात्, समयोचितपद्यमालिकायाः च अन्यानि कानिचित् रसमयानि पद्यानि -

- वृक्षाग्रवासी न च पक्षिजातिः तृणं च शय्या न च राजयोगी ।
  आपीतवर्णो न च हेमधातुः अतश्च ताम्रः सुरसः क एषः ॥
- तातेन कथितं पुत्र लेखं लिख ममाज्ञया ।
  न तेन लिखितो लेखः पितुराज्ञा न लङ्घितः ॥
- एकचक्षुर्न काकोऽयं बिलमिच्छन्न पन्नगः ।
  क्षीयते वर्धते चैव न समुद्रो न चन्द्रमा ॥
- हतो हनुमता रामः सीता हर्षमुपागता ।
  रुदन्ति राक्षसास्सर्वे हा हारामो हतो हतः ॥
- विष्णोः का वल्लभा देवी लोकत्रितयचारिणी ।
  वर्णावाद्यन्तिमौ दत्त्वा कः शब्दः तुल्यवाचकः ॥
- पुरुषः कीदृशो वेत्ति प्रायेण सकलाः कलाः ।
  मध्यवर्णद्वयं त्यक्त्वा ब्रूहि कः स्यात् सुरालयः ॥
- सानुजः काननं गत्वा यातुधानान् जघान कः ।
  मध्ये वर्णत्रयं दत्त्वा रावणः कीदृशो वद ॥
- दन्तैर्हीनः शिलाभक्षी निर्जीवो बहुभाषकः ।
  गुमस्यूतिसमृद्धोऽपि परपादेन गच्छति ॥

षष्ठः पाठः **6** Lesson 6

# संसर्गः

संस्कृतकथासाहित्येषु नीतिबोधकाः बहवः ग्रन्थाः विद्यन्ते। तेषु "कथासरित्सागरः" इति अनेक कथाप्रतिपादकः कश्चित् महान् ग्रन्थः अस्ति। अत्र नानाविधाः कथाः नद्यः सागरे सङ्गताः इव सन्ति। अत एव ग्रन्थस्य इदं सार्थकं नाम। अस्मात् एका कथा अत्र पाठ्यविषयत्वेन प्रदत्ता विद्यते।

गुणवज्जनसंसर्गात् याति नीचोऽपि गौरवम्।
पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते॥



पुरा गान्धारदेशे विचित्रवल्लभः नाम राजा आसीत्। सः कदाचित् मृगयार्थं वनम् अगच्छत्। तत्र सः कञ्चन शूकरं दृष्ट्वा तम् अनुसरन् व्याधानाम् आवासं प्राप्तः। व्याधः पुरा एव आवासात् बहिः गतः। किन्तु तत्र गिरिकः नाम कश्चित् शुकः स्थितः आसीत्। सः शुकः दूरतः एव नृपं दृष्ट्वा "प्रहरत प्रहरत" "मारयत मारयत" अस्मात् सर्वस्वं गृह्यताम्! हत्वा अयं श्वभ्यो दीयताम् इति तारस्वरेण घोषणम् अकरोत्। तत् श्रुत्वा राजा दुःखितः तं देशं परिहाय दूरतः अचलत्। ततः अचिरात् एव मुनीनाम् आश्रमं प्राप्तवान्।

तत्रापि एकः पर्वतकः नाम आश्रमवासी शुकः आसीत्। सः राजानं दृष्ट्वा "स्वागतम् आर्य! प्रविश्यताम्, अद्य सनाथः अयम् आश्रमः। "अये, आसनं जलं फलानि च आनीयन्ताम्" इत्यकथयत्।

शुकस्य वचनं श्रुत्वा राजा आश्चर्यचकितः अपृच्छत् - "अरण्येऽस्मिन् व्याधावासे निवसता शुकेन अहं संतर्ज्य परुषवचनानि उक्तः। इदानीं त्वया अमृत-उपमैः वाक्यैः सन्तर्पितः। एकवंशप्रसूतयोः अपि युवयोः कथं शीलविपर्यासः?" इति।

ततः शुकः एवम् अवदत् - न केवलम् आवाम् एकवंशे जातौ, अपि तु सहोदरौ। अहं मुनिभिः आनीतः सः चानीतो किरातैः।

अहं मुनीनां वचनं शृणोमि
किरातानां सः वचः शृणोति।



Unit 6.indd 40 18-03-2019 12:20:56

न मे गुणोऽयं नहि चास्य दोषः

संसर्गजाः दोषगुणाः भवन्ति ।। इति ।

अतः सज्जनानां सङ्गमः सर्वदा श्रेष्ठः सर्वकार्यफलप्रदः च भवति ।



कविपरिचयः

कथासरित्सागरस्य रचयिता सोमदेवः । अयं एकादशशतके काश्मीरराजस्य अनन्तस्य आस्थाने कविरासीत् । अनन्तराजस्य खिन्नायाः पत्न्याः सूर्यवत्याः मनोविनोदनार्थं सः "कथासरित्सागरम्" इति ग्रन्थम् अरचयत् । सोमदेवः गुणाढ्येन विरचितां बृहत्कथाम् अनुसृत्य इमं ग्रन्थम् अकरोत् इति श्रूयते ।

## अभ्यासः

### I. कठिनशब्दार्थः-

| | | |
|---|---|---|
| 1. संसर्गः | - | association |
| 2. मृगयार्थम् | - | for hunting |
| 3. शूकरः | - | pig |
| 4. व्याधः | - | hunter |
| 5. आवासः | - | house |
| 6. शुकः | - | parrot |
| 7. नृपः | - | king |
| 8. वृक्षः | - | tree |
| 9. प्रहरत | - | catch |
| 10. तारस्वरः | - | very loud voice |
| 11. घोषणम् | - | proclamation |
| 12. आश्रमः | - | hermitage |
| 13. सन्तर्पितः | - | satisfied |
| 14. श्रेष्ठः | - | prosperous |
| 15. विपर्यासः | - | difference |



Unit 6.indd 41 18-03-2019 12:20:56

## II. समीचीनम् उत्तरं चिनुत-

1. किं पुष्पमालानुषङ्गेण शिरसि धार्यते?

   (i) पात्रम् (ii) पत्रम् (iii) सूत्रम्

2. गान्धारस्य राजा कः आसीत्?

   (i) विचित्रवल्लभः (ii) चित्रसेनः (iii) उग्रसेनः

3. किमर्थं राजा वनम् अगच्छत्?

   (i) धनार्थम् (ii) मृगयार्थम् (iii) जलार्थम्

4. राजा कम् अनुसरन् व्याधावासं प्राप्तः?

   (i) मृगम् (ii) सिंहम् (iii) शूकरम्

5. कः व्याधावासे स्थितः आसीत्?

   (i) वानरः (ii) काकः (iii) गिरिकः

6. गिरिकः नृपं दृष्ट्वा केन स्वरेण घोषणम् अकरोत्?

   (i) मन्दस्वरेण (ii) तारस्वरेण (iii) मध्यमस्वरेण

7. राजा अचिरात् एव कुत्र अगच्छत्?

   (i) पुरीम् (ii) राज्यम् (iii) मुनीनाम् आश्रमम्

8. आश्रमे को खगः राज्ञे स्वागतम् अकरोत्?

   (i) पर्वतकः नाम शुकः (ii) पिकः (iii) काकः

9. पर्वतकः केषां वचनानि शृणोति ?

   (i) मित्राणाम् (ii) आचार्याणाम् (iii) मुनीनाम्

10. गिरिकः नाम शुकः केषां वचनानि शृणोति ?

   (i) राक्षसानाम् (ii) देवानाम् (iii) किरातानाम्

## III. अधो लिखितानां प्रश्नानाम् उत्तराणि लिखत-

1. गुणवज्जनसंसर्गात् कः गौरवं याति ?
2. गान्धारदेशस्य राजा कः आसीत्?
3. राजा किमर्थं वनम् अगच्छत्?
4. राज्ञा कस्य आवासस्थलं प्राप्तम्?
5. गिरिकः राजानं दृष्ट्वा किम् अघोषयत्?
6. गिरिकस्य वचनं श्रुत्वा राजा किमकरोत्?
7. मुनीनाम् आश्रमे राजा किमपश्यत्?
8. कः आश्रमे राजानं स्वागतम् अकरोत्?
9. कीदृशैः वाक्यैः राजा सन्तर्पितः आसीत्?
10. मानवानां दोषगुणाः कथं भवन्ति?



Unit 6.indd 42 18-03-2019 12:20:56

## IV. सविस्तरं उत्तरं लिखत-

1. संसर्गस्य महत्वम् अधिकृत्य यथापाठं लिखत।
2. संसर्गजा दोषगुणाः भवन्ति – कथामाध्यमेन विवृणुत।

## V. रिक्तस्थानानि पूरयत-

1. विचित्रवल्लभः ________ वनं अगच्छत्।
2. वने सः कञ्चन ___________ अनुसरन् अगच्छत्।
3. गिरिकस्य वचनं श्रुत्वा राजा ________ आसीत्।
4. संसर्गजाः __________ भवन्ति।
5. युवयोः कथं शील _________ ।

## VI. योजयत-

| S.No. | अ | आ |
|---|---|---|
| 1 | पुष्पमालानुषङ्गेण सूत्रम् | आश्रमवासी शुकः |
| 2 | विचित्रवल्लभः | व्याधावासे स्थितः शुकः |
| 3 | गिरिकः | सर्वकार्यफलप्रदः |
| 4 | पर्वतकः | गान्धारदेशस्य राजा |
| 5 | सज्जनसंसर्गः | शिरसि धार्यते |

***********

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

सोमदेवस्य "कथासरित्सागरे" लेखनपद्धतिः पठनावगमनार्थं अति सुलभा। कथासु सरलता विशेषतः दृश्यते। अस्मिन् विविधदेशजनसम्बद्धाः अनेकात्युत्कृष्टकथाः सन्ति। ग्रन्थोऽयं विविधभाषासु विपरिणामः कृतः अस्ति।

केचन प्रसिद्धाः कथाग्रन्थाः -

| S.No. | कथा ग्रन्थाः | कवयः |
|---|---|---|
| 1 | बृहत्कथा | गुणाढ्यः |
| 2 | बृहत्कथामञ्जरी | क्षेमेन्द्रः |
| 3 | पञ्चतन्त्रम् | विष्णुशर्मन् |
| 4 | हितोपदेशः | नारायणपण्डितः |
| 5 | सज्जनसंसर्गः | शिरसि धार्यते |



Unit 6.indd 43 18-03-2019 12:20:57

## व्याकरण-अभ्यासः - 3

दकारान्तः पुंलिङ्गः"तद्" शब्दः (He, that)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सः | तौ | ते |
| द्वितीया | तम् | तौ | तान् |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |

दकारान्तः स्त्रीलिङ्गः तद्" शब्दः (She, that)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सा | ते | ताः |
| द्वितीया | ताम् | ते | ताः |
| तृतीया | तया | ताभ्याम् | ताभिः |
| चतुर्थी | तस्यै | ताभ्याम् | ताभ्यः |
| पञ्चमी | तस्याः | ताभ्याम् | ताभ्यः |
| षष्ठी | तस्याः | तयोः | तासाम् |
| सप्तमी | तस्याम् | तयोः | तासु |

दकारान्तः नपुंसकलिङ्गः"तद्" शब्दः (It, that)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | तत् | ते | तानि |
| द्वितीया | तत् | ते | तानि |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |



Unit 6.indd 44 18-03-2019 12:20:57

## अनुच्छेदलेखनम् – 3
## (Comprehension – 3)



काञ्चीपुर्यां कश्चन विद्वान् अवर्तत । सः बहून् अध्यापयन् अजीवयत् । कस्मिंश्चित् दिवसे कश्चित् बालकः विदुषः समीपं गत्वा “भो आर्य! मम विद्या अभ्यसनीया इति अपेक्षा अतीव वर्तते । तस्मात् भवान् विद्याम् उपदिशन्तु इति प्रार्थयामास । सः विद्वान् तस्य बालकस्य प्रतिभां परिशोधयितुम् इच्छन् एवम् अपृच्छत् - हे बालक! देवः कुत्र अस्ति? इति । सः बालः देवेन रहितं स्थलं प्रथमतः भवान् आवेदयतु ततः अहं विज्ञापयिष्यामि इति अकथयत् । सः विद्वान् तस्य बालकस्य वचनम् आकर्ण्य अयम् अतिबुद्धिमान् इति आलोच्य तदपेक्षानुसारं तस्मै विद्याम् उपदिदेश ।

नीतिः - बुद्धिमतां आबाल्यात् युक्तयः स्फुरन्ति ।

प्रश्नाः-

1. विद्वान् कुत्र अवर्तत ?
2. कः विदुषः समीपम् अगच्छत् ?
3. विद्वान् तं परिशोधयितं किमपृच्छत् ?
4. बालकः किम् अकथयत् ?
5. विद्वान् बालोऽयं कीदृशः इति आलोचितवान् ?
6. अस्याः कथायाः नीतिः का ?



Unit 6.indd 45 18-03-2019 12:20:57

## अनुवादः – 3

## (Translation - 3)



श्रीवत्सो नाम शिष्यः अनेकान् वर्षान् गुरुकुलवासं कृत्वा अन्ते गुरुं पृष्टवान् – कां गुरुदक्षिणां दद्याम्? इति । गुरुः उक्तवान् - त्वं मह्यं निरुपयोगीनि मुष्टिपूर्णानि पर्णानि गुरुदक्षिणारूपेण देहि इति । तत् श्रुत्वा मुदितः सः पर्णानि अन्वेष्टुं प्रस्थितवान् । कस्यचन कृषिक्षेत्रस्य समीपे शुष्कपर्णानि दृष्ट्वा तान् ग्रहीतुं गतवान् । तदा तत्र एकः कृषकः तम् अवदत्, एतानि पर्णानि निरूपयोगीनि न । एतानि ज्वालयित्वा कृषिक्षेत्रे क्षिपेयं चेत् धान्यम् इतोऽपि अधिकतया उत्पद्येत इति । ततः सः नद्यां पतितानि पर्णानि स्वीकर्तुं प्रयत्नम् अकरोत् । तत्र सः पर्णेषु स्थितान् कीटान् अपश्यत् । एकस्मिन् वृक्षे पर्णं दृष्ट्वा तत् स्वीकर्तुं यदा तत्समीपं गतः, तदा पर्णमूले नूतनपर्णस्य अङ्कुरः उद्भवन् आसीत् । एवं येन केनचित् रूपेण पर्णानि उपयोगीनि एव। श्रान्तः सः रिक्तहस्तः सन् गुरुम् उक्तवान् - “एकमपि निरूपयोगी पर्णं मया न प्राप्तम् इति । गुरुः प्रत्युवाच – जगति किमपि वस्तु निरुपयोगी नास्ति । एतत्स्मरन् यशस्वी भव इति ।



Unit 6.indd 46 18-03-2019 12:20:57

सप्तमः पाठः 7

Lesson 7

# चारवचनम्

किरातार्जुनीयं नाम महाकाव्यं महाकविभारविना विरचितम्। किरातवेषधारिणा शिवेन सह अर्जुनस्य संगरः अत्र वर्णितः। अत एव अस्य ग्रन्थस्य किरातार्जुनीयम् इति नाम अभवत्। काव्ये अस्मिन् अष्टादश सर्गाः सन्ति। अत्र प्रस्तुतः पाठ्यभागः प्रथमसर्गात् स्वीकृतः। वनवाससमये युधिष्ठिरः दुर्योधनस्य राज्यपरिपालनं ज्ञातुं चारं नियोजितवान्। सः चारः दुर्योधनस्य राज्यपरिपालनं ज्ञात्वा द्वैतवने युधिष्ठिरम् उपगम्य निवेद्यमानं तस्य वचनमेव चारवचनम्।



क्रियासु युक्तैर्नृप चारचक्षुषो न
वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः।। 1

स किंसखा साधु न शास्ति योऽधिपं
हितान्न यः संशृणुते स किंप्रभुः।
सदानुकूलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसम्पदः।। 2

निसर्गदुर्बोधमबोधविक्लवाः
क्व भूपतीनां चरितं क्व जन्तवः।
तवानुभावोऽयमवेदि यन्मया
निगूढतत्वं नयवर्त्म विद्विषाम् । 3

असक्तमाराधयतो यथायथं
विभज्य भक्त्या समपक्षपातया ।
गुणानुरागादिव सख्यमीयिवान्न
बाधतेऽस्य त्रिगणः परस्परम् ।। 4

निरत्ययं साम न दानवर्जितम्
न भूरि दानं विरहय्य सत्क्रियाम् ।
प्रवर्तते तस्य विशेषशालिनी
गुणानुरोधेन विना न सत्क्रिया।। 5

वसूनी वाञ्छन्न वशी न मन्युना
स्वधर्म इत्येव निवृत्तकारणः ।
गुरूपदिष्टेन रिपौ सुतेऽपि वा
निहन्ति दण्डेन स धर्मविप्लवम् ।। 6

विधाय रक्षान्परितः परेतरान-
शङ्किताकारमुपैति शङ्कितः।
क्रियापवर्गेष्वनुजीविसात्कृताः
कृतज्ञतामस्य वदन्ति संपदः ।। 7

अनारतं तेन पदेषु लम्भिता
विभज्य सम्यग्विनियोगसत्क्रियाः ।
फलन्त्युपायाः परिबृंहिताय-
तीरुपेत्य संघर्षमिवार्थसंपदः।। 8


Unit 7.indd 48 18-03-2019 12:22:12

**कविपरिचयः**

संस्कृतभाषायाम् पञ्चमहाकाव्येषु अन्यतमं भारवेः किरातार्जुनीयम् । महाभारतम् अनुसृत्य लिखिते अस्मिन् काव्ये अष्टादश सर्गाः सन्ति । भारवेः वचः नारिकेलफलसम्मितम् भवति । अस्य पद्यानि अर्थपुष्ट्या वर्तन्ते । अत एव सुभाषिते 'भारवेः अर्थगौरवम्' इति ख्यातिः ।

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. अनुकूलम् - favourable
2. चारः - spy
3. नृपः - king
4. अमात्यः - minister
5. चरितम् - character
6. सख्यम् - friendship
7. परस्परम् - mutual
8. सत्क्रिया - good deed
9. वसूनि - wealth
10. मन्युः - anger
11. रिपुः - enemy
12. परितः - around
13. कृतज्ञता - gratefulness
14. उपायः - plan

### II. अधो निर्दिष्टानां पदानां विपरीतपदानि लिखत –

| | | | | | |
|---|---|---|---|---|---|
| 1. हितम् | × | अहितम् | 2. दुर्लभम् | × | सुलभम् |
| 3. अनुकूलम् | × | प्रतिकूलम् | 4. दुर्बोधम् | × | सुबोधम् |
| 5. अनुरागः | × | विरागः | 6. रिपुः | × | मित्रम् |
| 7. असक्तम् | × | सक्तम् | 8. युक्तम् | × | अयुक्तम् |



Unit 7.indd 49 18-03-2019 12:22:12

### III. अधो विद्यमानानां पदानां व्याकरणरूपं लिखत-

1. क्रियासु – सप्तमी, बहुवचनम्  of क्रिया शब्दः
2. अर्हसि – लट् लकारः,  मध्यमपुरुषः, एवचनम्  of अर्ह् -  to deserve
3. शास्ति – लट् लाकरः, प्रथमपुरुषः, एकवचनम्  of  शास् to govern
4. संशृणुते – लट् लकारः आत्मनेपदी, प्रथमपुरुषः, एकवचनम् of श्रू with सम् to hear
5. प्रवर्तते – लट् लकारः, आत्मनेपदी, प्रथमपुरुषः एकवचनम् of वृत् with प्र to remain
6. निहन्ति – लट् लकारः, प्रथमपुरुषः, एकवचनम् of हन् with नि to kill

### IV. यथोचितं सन्धिम् अथवा सन्धिविच्छेदं कुरुत-

1. युक्तैर्नृप – युक्तैः + नृप
2. अतोऽर्हसि – अतः + अर्हसि
3. प्रभवोऽनुजीविभिः – प्रभवः + अनुजीविभिः
4. योऽधिपम् - यः + अधिपम्
5. हितान्न – हितात् + न
6. सदानुकूलेषु - सदा + अनुकूलेषु
7. नृपेष्वमात्येषु – नृपेषु + अमात्येषु
8. यन्मया – यत् + मया
9. वाञ्छन्न – वाञ्छन् +  न
10. इत्येव – इति + एव

### V. अधो लिखितानां पदानां विग्रहं लिखत-

| | | |
|---|---|---|
| 1. चारचक्षुषः | - | चार एव चक्षुः, येषां ते । |
| 2. किंसखा | - | कुत्सितः सखा |
| 3. किंप्रभुः | - | कुत्सितः प्रभुः |
| 4. भूपतीनाम् | - | भुवां पतिः, तेषाम् |
| 5. गुरूपदिष्टेन | - | गुरुणा उपदिष्टः, तेन |



Unit 7.indd 50 18-03-2019 12:22:12

## VI. अधः प्रदत्तानां शब्दानां समानार्थकं पदं लिखत-

1. नृपः – राजा
2. अमात्यः – सचिवः
3. सखा – मित्रम्
4. रिपुः – शत्रुः
5. सुतः – पुत्रः
6. वसूनि – धनानि
7. हितम् – पथ्यम्
8. मन्युः – क्रोधः

## VII. समीचीनम् उत्तरं चिनुत-

1. हितं मनोहारि च वचः __________

   (i) सुलभम् (ii) दुर्लभम् (iii) अलभम्

2. के चारचक्षुषः?

   (i) राजानः (ii) वनेचराः (iii) दूताः

3. यः अधिपं हितान् न शास्ति सः __________

   (i) सखा (ii) किंसखा (iii) अमात्यः

4. अबोधविक्लवाः के ?

   (i) भूपतयः (ii) जन्तवः (iii) चाराः

5. ____________ त्रिगणः इति उच्यते।

   (i) कामक्रोधलोभः (ii) जन्ममृत्युजराः (iii) धर्मार्थकामः

6. किरातार्जुनीये कति सर्गाः सन्ति ?

   (i) दश (ii) त्रयोदश (iii) अष्टादश

7. अस्य काव्यस्य कथा ____________ उद्धृता ।

   (i) रामायणात् (ii) भागवतात् (iii) महाभारतात्

8. युधिष्ठिरः वनेचरं कस्य राज्यपरिपालनं ज्ञातुं नियोजयति ?

(i) दुर्योधनस्य (ii) धृतराष्ट्रस्य (iii) कर्णस्य

9. दुर्योधनः केन दण्डेन निहन्ति ?

(i) गुरूपदिष्टेन (ii) जनोपदिष्टेन (iii) पित्रोपदिष्टेन

10. सदानुकूलेषु हि किं कुर्वते ?

(i) काठिन्यम् (ii) रतिम् (iii) विरोधम्

## VIII. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. कः दुर्लभं वचः ?
2. कः किंसखा?
3. अबोधविक्लवाः के?
4. दुर्योधनः धर्मार्थकामान् कथं सेवितवान्?
5. केन विना दुर्योधनस्य सत्क्रिया न प्रवर्तते?
6. राजा स्वधर्मं कथं परिपालितवान्?

## IX. सविस्तरम् उत्तरं लिखत-

1. चारोक्तिषु श्लोकत्रयं व्याख्यात ।
2. दुर्योधनः राज्यपरिपालनम् कथम् अकरोत् इति त्रिचतुर्षु श्लोकेषु विवृणुत ?

***********



Unit 7.indd 52 18-03-2019 12:22:12

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

### संस्कृतभाषायां पञ्चमहाकाव्यानि -

| काव्यम् | रचयिता |
|---|---|
| रघुवंशम् | कालिदासः |
| कुमारसम्भवम् | कालिदासः |
| किरातार्जुनीयम् | भारविः |
| शिशुपालवधम् | माघः |
| नैषधीयचरितम् | श्रीहर्षः |

### भारवेः महिमा -

महाकविभारविम् अधिकृत्य कपिलस्य उक्तिः -

अर्थदीधितिसन्दीप्ता विज्ञपद्मविकासिनी ।

ज्ञानलोकसदादर्शा भारवेरिव भारविः ।।

### भारवेः शैली एवं वर्ण्यते -

"उपमा कालिदासस्य भारवेः अर्थगौरवम् ।

दण्डिनः पदलालित्यं माघे सन्ति त्रयोगुणाः ।।"

भारवेः भाषायां लालित्यं माधुर्यं प्रौढत्वं च समीचीनं भवति ।

भावानुकूल्याः शब्दावल्याः विनियोगः एव तस्य प्रमुखं वैशिष्ट्यम् । एकाक्षरात्मकः श्लोकोऽयं तस्य वाग्वैभवं द्योतयति ।

न नोननुन्नो नुन्नोनो नाना नानानना ननु ।
नुन्नोऽनुन्नो ननुन्नेनो नानेना नुन्ननुन्ननुत् ।। (कि.15.14)

तस्य काव्ये शब्दानुप्रयोगः यथा -

विकाशमीयुर्जगतीशमार्गणाः विकाशमीर्युर्जगतीशमार्गणाः ।
विकाशमीयुर्जगतीशमार्गणाः विकाशमीयुर्जगतीशमार्गणाः ।।

महाकविः भारविः विविधविद्यापारङ्गतः, अनेक शास्त्रनिष्णातः च । तस्य वैदिकसाहित्ये, दर्शनेषु, धर्मशास्त्रेषु, राजनीतिशास्त्रे, पुराणेषु, काव्य-अलङ्कार-नाट्यशास्त्रेषु च अस्खलिता मतिः ।

### Weblinks :

1. https://en.m.wikipedia.org>wiki>maha
2. https://www.britannica.com>art>maha
3. https://www.revolvy.com>page>maha
4. https://www.advaita.vedanta.org>advaita



Unit 7.indd 53 18-03-2019 12:22:13

अष्टमः पाठः 8

# Lesson 8
# पर्यावरणम्

परिवृणोति अस्मात् इति पर्यावरणं कथ्यते ।

संरक्षेत् दुषितो न स्यात्
लोकः मानवजीवनम् ।
न कोऽपि कस्यचित् नाशं
कुर्यात् अर्थस्य सिद्धये।।

'लोकाः समस्ताः सुखिनो भवन्तु' इति प्राज्ञाः सदा ब्रुवन्ति । न केवलं मनुष्याः परं तु सर्वे चराचराः अपि सुखिनः स्युः, तर्हि अस्माकं सौख्यम् निश्चितमेव। अत एव वेदाः शास्त्राणि च पञ्चभूतानि वृक्षान् च स्तुत्वा, तेषां पालनम् अपि अतिमुख्यम् इति च वदन्ति।




पर्यावरणविज्ञानं वेदेभ्यः उद्भूतं भवति। 'माता भूमिः पुत्रोऽहम् पृथिव्याः' इति अथर्ववेदः । पृथिव्याः वसून् उपभुञ्जानाः भारतीयाः तेषां पुनः वर्धने उद्यमं कुर्वन्तः आसन्। 'यत् ते भूमे विखनामि क्षिप्रं तदपि रोहतु' इति च अथर्ववेदः । कोऽपि मातरं हिंसां न करिष्यति इति 'पृथिवी मातर्मा हिंसी मा अहम् त्वाम्' इति यजुर्वेदवाक् भवति ।

जलम् अमृततुल्यं भवति । तस्य शुद्धत्वपालनं सर्वथा करणीयम् । पुण्यतीर्थेषु निमज्जनात् पूर्वं स्नात्वा एव निमज्जनीयम् इति शास्त्राणि वदन्ति । अप्सु अशुद्धं न करणीयम् इति तैत्तरीय-आरण्यके निर्दिष्टम् । स्मृतिः अपि 'जलं न प्रदूषयेत्' इति शास्ते।

प्रदूषणात् वायुमण्डलस्य पालनं कर्तव्यमेव । ऋग्वेदः वातः अस्माकं पिता इति भाषते। वायुः भूमौ स्थितानां विविधानाम् औषधीनां सुगन्धं वहन् अस्माकं भेषजं भवतु, आयुरारोग्यं च तनोतु इति ऋग्वेदः कथयति। शान्तिपाठे 'शं नो अस्तु द्विपदे; शं चतुष्पदे' इति पक्षीणां मृगाणां च मङ्गलं भवतु इति प्रार्थितम्। मत्स्यपुराणं 'दशपुत्रसमो द्रुमः' इति वाक्येन द्रुमस्य श्रेष्ठत्वं प्रकटीकरोति ।

जीवराशीनां पुनरावर्तनपालनार्थं सर्वे जन्तवः आवश्यकाः । एकस्याः जीवजात्याः सर्वनाशं पुनरावर्तनपालनस्य विनाशाय इति ज्ञानवन्तः महान्तः वदन्ति। द्वैतवने वासं कृतवन्तः पाण्डवाः तत्र आखेटेनेन जीवराशीनाम् अत्यन्तं नाशं भवेयुः इति विचिन्त्य वनान्तरम् अगच्छन् ।

तथैव जनमेजयेन कृते सर्पयागे अस्तीको नाम ऋषिः सर्पाणां सर्वनाशं पुनरावर्तनपालननाशाय इति राजानम् अबोधयत् । ततः जनमेजयेन सर्पयागः त्यक्तः । ऋषीणां आश्रमे मृगाः पक्षिणः च न हन्तव्याः इति विधिः ।

महाकविभिः तेषां काव्येषु पर्यावरणसंरक्षणं भारतीयैः कृतम् इति निरूपितं विद्यते । 'शकुन्तला आश्रमे वृक्षान् स्वयमेव परिषिञ्च्य सोदरस्नेहेन वर्धयति स्म' इति वर्णयति शाकुन्तलम् । वसिष्ठस्य आश्रमे ऋषिपत्न्यः स्वपुत्रान् इव मृगान् अपालयन् ।

सांप्रतिके काले अस्माकं प्रमादेन समग्रमपि भूमण्डलं दूषितं भवति। पर्यावरणप्रदूषणस्य प्रभावात् भविष्यत्काले मानवसभ्यताया विनाशमपि भवेत् एव । अतः पर्यावरणतोलनार्थं विश्वस्वास्थ्य संघटनेन (World Health Organisation) उपायाः प्रतिपादिताः विद्यन्ते ।

अस्माकं देशेऽपि सर्वकारद्वारा 'स्वच्छ भारतम्' इति नाम्ना पर्यावरणप्रदूषणस्य निवारणार्थं व्यवस्था क्रियते। जनजागरणं प्रचलति। प्रदूषणनिवारणोपायाः विधयश्चापि निर्दिश्यन्ते । एवं विविधोपायैः पर्यावरणपालनं आवश्यकम् इति निश्चप्रचम् ।



Unit 8.indd 55 18-03-2019 12:23:30

## अभ्यासः

### I. कठिनशब्दार्थः-

1. प्राज्ञाः - wise men
2. वातः - wind
3. पालनम् - protection
4. प्राणिगणः - host of living creatures
5. वनान्तरम् - another forest
6. सोदरस्नेहेन - with fraternal love
7. विहङ्गानाम् - of the birds
8. विश्वासः - confidence
9. प्रमादः - carlessness
10. दूषितम् - polluted
11. जनजागरणम् - awareness among people
12. क्षिप्रम् - immediately

### II. समीचीनम् उत्तरं चिनुत-

1. सर्वेषां चराचराणां सौख्यं कथं निश्चितं भवति?
   (i) पञ्चभूतैः (ii) पञ्चसंस्कारैः (iii) पञ्चेन्द्रियैः
2. आधुनिक - पर्यावरणविज्ञानं केभ्यः उद्भूतं भवति?
   (i) इतिहासाभ्याम् (ii) पुराणेभ्यः (iii) वेदेभ्यः
3. "माता भूमिः पुत्रोऽहम् पृथिव्याः" इति को वेदः वदति?
   (i) गान्धर्ववेदः (ii) सामवेदः (iii) अथर्ववेदः
4. भारतीयाः वयं कस्याः वसून् भुञ्जामः ?
   (i) पित्रोः (ii) पृथिव्याः (iii) देवतानाम्
5. "पृथिवी मातर्मा हिंसी मा अहम् त्वाम्" इति _______
   (i) अथर्ववेदवाक् (ii) यजुर्वेदवाक् (iii) सामवेदवाक्
6. जलम् न प्रदूषयेत् इति का शास्ते ?
   (i) स्मृतिः (ii) विस्मृतिः (iii) सुनीतिः



Unit 8.indd 56 18-03-2019 12:23:31

7. वातः अस्माकं पिता इति को वेदः  भाषते ?

(i) धनुर्वेदः (ii) सामवेदः (iii) ऋग्वेदः

8. कः ऋषिः सर्पयागः तेषां पुनरावर्तननाशाय इति अबोधयत् ?

(i) अत्रिः (ii) अस्तीकः (iii) अगस्त्यः

9. वसिष्ठस्य आश्रमे ऋषिपत्न्यः कथं मृगान् अपालयन् ?

(i) स्वपुत्रान् इव (ii) स्व पितॄन् इव (iii) स्वपतयः इव

10. सांप्रतिके काले समग्रमपि भूमण्डलं ______

(i) पोषितम् (ii) पालितम् (iii) दूषितम्

11. पर्यावरणप्रदूषणस्य निवारणार्थं का व्यवस्था क्रियते?

(i) स्वर्णभारतम् (ii) स्वच्छभारतम् (iii) स्वस्थभारतम्

## III. अधो दत्तानां प्रश्नानाम् उत्तरं लिखत-

1. वेदाः शास्त्राणि च केषां पालनम् अतिमुख्यम् इति वदन्ति ?
2. आधुनिकपर्यावरणविज्ञानं कस्मात् उद्भूतम्?
3. जलं कस्य तुल्यं भवति ?
4. ऋग्वेदे वायुं  कः इति भाषते?
5. कस्मिन् पुराणे द्रुमस्य श्रेष्ठत्वम् उक्तम्?
6. पाण्डवाः किमर्थं वनान्तरम् अगच्छन् ?
7. कुत्र मृगाः पक्षिणः  च न हन्तव्याः इति विधिः वर्तते ?

## IV. सविस्तरम् उत्तरत-

1. पर्यावरणमधिकृत्य यथामति स्वभाषया लिखत।
2. पञ्चभूतानां वृक्षाणां च रक्षणं पूर्वजैः कथं कृतमिति विवृणुत।

## V. रिक्तस्थानानि पूरयत-

1. आधुनिक पर्यावरणविज्ञानं __________ उद्भूतम् भवति।
2. अप्सु __________ न करणीयम्।
3. प्रदूषणात् __________ पालनम् कर्तव्यमेव।
4. ऋषिपत्न्यः __________ इव मृगान् अपालयन्।
5. विविधोपायैः __________ आवश्यकम्।

***********

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

पर्यावरणसंरक्षणं भारतीयचिन्तनम् ।

वृक्ष-वनस्पतिसंरक्षणम् –

वृक्षाः मानवं जीवनशक्तिं ददाति । प्रदूषणं च नाशयति ।

(i) प्राणो वै वनस्पतिः (ऐत.ब्रा.2.4)

(ii) वीरुधो वैश्वदेवीः उग्राः पुरषजीवनीः (अथर्व.8.74)

वृक्षारोपणं जीवनरक्षणार्थं कार्यम् –

ऋग्वेदे कथ्यते यत् वृक्षारोपणम् अवश्यं कार्यम् । एते प्रदूषणं निवारयन्ति प्राणवायुं च ददति । जलस्रोतांसि च रक्षति ।

वनस्पतिं वन आस्थापदध्वं

निषूदधिध्वम् अश्वनन्त उत्यम् (ऋग् – 648.17)

किञ्च वृक्षाः कारबन्-डै-आक्साइड् ($CO_2$) रूपं विषं पिबन्ति अमृतरूपं प्राणवायुं ($O_2$) वितरन्ति च। अद्यापि जनाः वृक्षान् देवतास्वरूपेण प्रणमन्ति ।

(i) ओषधयो वै पशुपतिः (शत.ब्र.6.1.3.12)

(ii) नमो वृक्षेभ्यो हरिकेशेभ्यः । वनानां पतये नमः । औषधीनां पतये नमः (यजु.वे.16.17.19)

अस्मान् परितः यानि पञ्चमहाभूतानि सन्ति तेषां समवायः एव परिसरः अथवा पर्यावरणम् इति पदेन व्यवह्रियते। मनुष्यो यत्र निवसति, यत् खादति, यत् वस्त्रं धारयति, यज्जलं पिबति, यस्य पवनस्य यतनं करोति, तत्सर्वं 'पर्यावरणम्' इति शब्देनाभिधीयते।

Web link -

1. Environmental awareness in classical Sanskrit – Speaking tree https://www.speaking tree.in>blog.
2. Environment conservation in Anicent India – 10SR Journels www.iosr-journals.org>version -11
3. History of environmental protection in India https://www.scribd.com>document



Unit 8.indd 58 18-03-2019 12:23:31

## व्याकरण–अभ्यासः - 4

### धातुः - परस्मैपदी - विधिलिङ् (Potential mode)

भू भव् to be

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भवेत् | भवेताम् | भवेयुः |
| मध्यमपुरुषः | भवेः | भवेतम् | भवेत |
| उत्तमपुरुषः | भवेयम् | भवेव | भवेम |

अस् – to be

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | स्यात् | स्याताम् | स्युः |
| मध्यमपुरुषः | स्याः | स्यातम् | स्यात |
| उत्तमपुरुषः | स्याम् | स्याव | स्याम |

कृ (कर्) – to do

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | कुर्यात् | कुर्याताम् | कुर्युः |
| मध्यमपुरुषः | कुर्याः | कुर्यातम् | कुर्यात |
| उत्तमपुरुषः | कुर्याम् | कुर्याव | कुर्याम |

वद् – to speak

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वदेत् | वदेताम् | वदेयुः |
| मध्यमपुरुषः | वदेः | वदेतम् | वदेत |
| उत्तमपुरुषः | वदेयम् | वदेव | वदेम |

पठ् – to read

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठेत् | पठेताम् | पठेयुः |
| मध्यमपुरुषः | पठेः | पठेतम् | पठेत |
| उत्तमपुरुषः | पठेयम् | पठेव | पठेम |



Unit 8.indd 59 18-03-2019 12:23:31

## अनुच्छेदलेखनम् – 4

## (Comprehension – 4)



उज्जयिन्यां सुदर्शनो नाम कश्चन लोकप्रसिद्धः पुरुषः आसीत् । तस्य एकः पुत्रः आसीत् । सः तावत् दुष्टान् सर्वान् अपि पीडयन्, विदुषः परिहसन्, दरिद्रानपि बाधमानः बभूव। तं दृष्ट्वा राजा नितरां चिन्तया एवम् अवदत् – अये वत्स, त्वम् एवं सर्वानपि मा पीडय । भवदीयदौष्ट्येन ममापि अपयशः भविष्यति । त्वया कृतदूषणेन तेषां न किमपि हीयते । यः कोऽपि सूर्यं दृष्ट्वा असूयया गण्डूषजलैः थूत्करोति चेत् सूर्यस्य न कापि हानिः, किन्तु स्वमुखमेव दूषितं भवेत् इति । पितुः उपदेशं श्रुत्वा सः स्वीयं दौष्ट्यम् अत्यजत् ।

।। नीति – मूर्खाः सामोपायेन समीकरणीयाः ।।

प्रश्नाः-

1. उज्जयिन्यां कः आसीत् ?
2. पुत्रः कीदृशः बभूव ?
3. पुत्रस्य दौष्ट्येन किं भविष्यति इति पित्रा उक्तम् ?
4. पितुः उपदेशं श्रुत्वा बालः किम् अत्यजत् ?
5. मूर्खाः केन समीकरणीयाः ?
6. अस्य गद्यांशस्य नीतिः का ?



Unit 8.indd 60 18-03-2019 12:23:32

## अनुवादः – 4

## (Translation - 4)



पूर्वं कश्चन वणिक् वसति स्म। कदाचित् कश्चित् धनिकः तम् उक्तवान् - 'भवान् तु महाबुद्धिमान्; किन्तु भवतः पुत्रः तु नितरां मूढः, तं बोधयतु' इति । वणिक् तं किमभवत् ? इति अपृच्छत् । तदा धनिकः सुवर्णरजतयोः कस्य मूल्यम् अधिकम् इत्यपि सः न जानाति इति उक्तवान्। नितरां खिन्नः वणिक् गृहं गत्वा पुत्रं सुवर्णरजतयोः कस्य मूल्यम् अधिकम् इति पृष्टवान्। पुत्रः प्रत्यवदत् - सुवर्णस्य इति । तत् श्रुत्वा 'धनिकस्य पुरतः किमर्थं मूढमिव आचरितवान्' इति अपृच्छत् । तदा पुत्रः आह - मम विद्यालयगमने माम् आहूय सः धनिकः स्वर्णनाणकं रजतनाणकं च प्रदर्श्य इतः अधिकमूल्यवत् नाणकं स्वीकुरु इति अवोचत्। अहं रजतनाणकं स्वीकरोमि स्म। तदा उच्चैः हसति स्म। एवं प्रतिदिनं एकं रजतं नाणकं प्राप्नोमि स्म । यस्मिन् दिने अहं सुवर्णनाणकं स्वीकुर्यां तस्मिन् दिने एषा क्रीडा समाप्ता भवेत् । इदानीं तु तेषां मुखात् मूर्खः इति वचनं श्रुण्वन् अहम् एतावत् धनं प्राप्तवान् । अल्पे एव वयसि पुत्रस्य चातुर्यं दृष्ट्वा पिता सन्तुष्टः अभवत् ।।



Unit 8.indd 61 18-03-2019 12:23:32

नवमः पाठः 9

Lesson 9

# आरोग्यभोजनम्

जीवने सुखशान्त्यादीनां प्राप्तिः आरोग्येन साध्यते । रोगनिवारणापेक्षया रोगनिरोधमेव वरमिति तु आरोग्यसूत्रम् । मनुष्याणां स्वास्थ्यलाभाय आयुर्वेदः सर्वोत्तमः हेतुः अस्ति। बहुकालात् आयुर्वेदस्य प्रचारः प्रयोगः च भारतदेशे प्रचलत्येव । लोके तु धन्वन्तरिः आयुर्वेदस्य देवः इति पूज्यते । चरकः सुश्रुत – वाग्भटादयः आयुर्वेदस्य प्रसिद्धाः आचार्याः आसन् । ते बहून् आयुर्वेदग्रन्थान् अरचयन्। अस्मिन् पाठे अष्टाङ्गहृदयात् श्लोकाः उद्धृताः भवन्ति।



भोजननियमः -

षड्रसं मधुरप्रायं नातिद्रुतविलम्बितम्।
स्नातः क्षुद्वान् विविक्तस्थो धौतपादकराननः। 1

समीक्ष्य सम्यगात्मानम् अनिन्दन्नब्रुवन् द्रवम् ।
इष्टमिष्टैः सहाश्नीयाच्छुचि भक्तजनाहृतम् ।। 2



Unit 9.indd 62 18-03-2019 12:24:51

## खाद्यवस्तूनि -

कारवेल्लं सकटुकं दीपनं कफजित्परम् ।
वातार्कं कटु तिक्तोष्णं मधुरं कफवातजित् ॥ 3

तृष्णाकासश्रमश्वासस्वरभेदक्षतक्षयान् ।
उद्रिक्तपित्ताञ्जयति त्रीन् दोषान् स्वादु दाडिमम् ॥ 4

पित्तप्रकोऽपि तीक्ष्णोष्णं रुक्षं रोचनदीपनम् ।
रसे पाके च कटुकं कफघ्नं मरीचं लघु ॥ 5

लशुनो भृशतीक्ष्णोष्णः कटुपाकरसः सरः ।
हृदयः केश्योः गुरुर्वृष्यः स्निग्धो रोचनदीपनः ॥ 6

हिंगु वातकफानाहशूलघ्नं पित्तकोपनम् ।
कटुपाकरसं रुच्यं दीपनं पाचनं लघु ॥ 7

कटु पाके हिमं केश्यं अक्षमीषच्च तद्गुणम् ।
इयं रसायनवरा त्रिफलाऽक्ष्यामयापहा ॥ 8

**कविपरिचयः**

अष्टाङ्गहृदयम् इति आयुर्वेदग्रन्थस्य कर्ता महर्षिः वाग्भटः । सिन्धु देशे अस्य जननम् आसीत् । अस्य पिता सिंहगुप्तः । अस्य कालः प्रायः सप्तमशतकम् इति गण्यते।

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. वातः - the wind in human body
2. कटुः - bitter
3. हिंगुः - asafoetida
4. लशुनः - garlic
5. तृष्णा - thirst



Unit 9.indd 63 18-03-2019 12:24:51

6. दाडिमम् - pomegranate

7. कफम् - phlegm

8. पित्तम् - bile

## II. अधो निर्दिष्टानां पदानां विपरीतपदानि लिखत-

| | | | | | |
|---|---|---|---|---|---|
| 1. द्रुतम् | × | विलम्बम् | 2. मधुरम् | × | कटु |
| 3. शुचिः | × | अशुचिः | 4. उष्णम् | × | शीतम् |
| 5. क्षयम् | × | अक्षयम् | 6. नित्यम् | × | अनित्यम् |
| 7. गुरुः | × | लघुः | 8. दोषः | × | गुणः |

## III. अधो विद्यमानानां पदानां व्याकरणरूपं लिखत-

1. जयति - लट् लकारः, प्रथमपुरुषः, एकवचनम् of जी (जय्) to conquer
2. समीक्ष्य - ल्यवन्तमव्ययम् of ईक्ष् with सम् to see
3. स्यात् - विधिलिङ्, प्रथमपुरुषः, एकवचनम् of अस् to be
4. इच्छेत् - विधिलिङ्, प्रथमपुरुषः, एकवचनम् of इच्छ् to wish
5. अब्रुवन् - लङ् लकारः, प्रथमपुरुषः, बहुवचनम् of ब्रू (वच्) to speak
6. अनिन्दन् - लङ् लकारः, प्रथमपुरुषः, बहुवचनम् of निन्द् to censure

## IV. यथोचितं सन्धिम् अथवा सन्धिविच्छेदं कुरुत-

| | | | | |
|---|---|---|---|---|
| 1. इष्टमिष्टैः | - | इष्टम् | + | इष्टैः |
| 2. तीक्ष्णोष्णं | - | तीक्ष्ण | + | उष्णम् |
| 3. गुरुर्वृष्यः | - | गुरुः | + | वृष्यः |
| 4. पित्तप्रकोऽपि | - | पित्तप्रकः | + | अपि |
| 5. ह्यग्नेः | - | हि | + | अग्नेः |
| 6. गुरूण्यपि | - | गुरूणि | + | अपि |
| 7. प्रागेव | - | प्राक् | + | एव |
| 8. अनिन्दन्नब्रुवन् | - | अनिन्दन् | + | अब्रुवन् |



Unit 9.indd 64 18-03-2019 12:24:51

## V. अधो लिखितानां पदानां विग्रहं लिखत-

1. स्निग्धोष्णम् - स्निग्धश्च तत् उष्णं च तयोः समाहारः ।
2. असक्तः - न सक्तः ।
3. सकटुकम् - कटुकेन सह वर्तते इति ।
4. तीक्ष्णोष्णम् - तीक्ष्णं च तत् उष्णं च तयोः समाहारः ।

## VI. अधः प्रदत्तानां शब्दानां समानार्थकं पदं लिखत-

1. शुचिः – पवित्रम्
2. लघु – अल्पम्
3. कालः – समयः

## VII. समीचीनम् उत्तरं चिनुत-

1. मनुष्याणां स्वास्थ्यलाभाय सर्वोत्तमः हेतुः कः ?

   (i) वेदः (ii) आयुर्वेदः (iii) उपवेदः

2. आयुर्वेदस्य देवः कः?

   (i) चरकः (ii) वाग्भटः (iii) धन्वन्तरिः

3. अष्टाङ्गहृदयम् इति ग्रन्थस्य कर्ता ________

   (i) चरकः (ii) वाग्भटः (iii) धन्वन्तरिः

4. वाग्भटस्य पिता ________

   (i) सिंहगुप्तः (ii) विष्णुगुप्तः (iii) चन्द्रगुप्तः

5. शरीरे विद्यमानाः दोषाः ________

   (i) वात, पित्त, कफाः (ii) कटु, अम्ल, तिक्ताः (iii) काम, क्रोध, लोभाः

6. दाडिमं कति दोषान् जयति ?

   (i) त्रीन् (ii) चत्वारि (iii) पञ्च

7. वातकफहरणे अत्युपयोगकरः वस्तु ________

   (i) हिंगु (ii) लशुनः (iii) दाडिमम्

8. ________ प्रतिकुर्वीत य इच्छेत् सुखमात्मनः ।

   (i) फलैः (ii) पानैः (iii) भेषजैः



Unit 9.indd 65 18-03-2019 12:24:51

## VIII. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. कैः सह भोजनं कर्तव्यम् ?
2. कारेवेल्लस्य एकं गुणं लिखत।
3. दाडिमं कान् जयति ?
4. मरीचः कं हन्ति ?
5. वातकफहरणे अत्युपयोगकरः वस्तु किम् ?
6. आत्मनः सुखाय किं कर्तव्यम्?

## IX. सविस्तरमुत्तरं लिखत-

1. आरोग्यभोजनम् इति पाठात् श्लोकत्रयं वर्णयत।
2. आरोग्यप्रदायकानि खाद्यवस्तूनि कानि इति यथापाठं श्लोकत्रयेण व्याख्यात।

***********

### ? पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

आयुर्वेदानुसारं शरीरे वात – पित्त – कफ इति त्रयः दोषाः सन्ति। तेषां सन्तुलनेन समुचितपालनेन च मनुष्यः स्वस्थः भवति। एकदा देवभिषजौ अश्विनीकुमारौ भुवमागत्य कः अरुक् इति आयुर्वेदाचार्यान् वाग्भटादीन् अपृच्छताम्। तदा वाग्भटः "हितभुक्, मितभुक्, ऋतुभुक च अरुक् भवति" इति उत्तरं ददौ। आहारविषयं सुश्रुतसंहितायाम् एवम् उक्तम् – आहारस्य संयक् परिणतस्य यः तेजोऽभूतः सारः परमसूक्ष्मः सः रसः इत्युच्यते। तस्य हृदयं स्थानम्। स हृदयात् चतुर्विंशतिधर्मनी अनुप्रविश्य . . . . कृत्सनं शरीरम् अहरहः तर्पयति, वर्धयति, धारयति, क्षपयति च अदृष्टहेतुकेन कर्मणा।

एवमेव अष्टाङ्गहृदयेऽपि उक्तम् -

अत्यम्बुपानात् विषमाशनाश्च। दिवा च सुप्तेः निशि जागराच्च।
संरोधनान्मूत्रपुरीषयोश्च षड्भिः नराणां प्रभवन्ति रोगाः।

वाग्भटस्य गरिमा

अत्रिः कृतयुगे वैद्यो द्वापरे सुश्रुतो मतः । कलौ वाग्भटनामा च गरिमात्र प्रदृश्यते ॥

- अष्टांगहृदये



Unit 9.indd 66 18-03-2019 12:24:51

# दशमः पाठः 10

## Lesson 10
## साधुवचनम्

इतः कोऽन्वस्ति मूढात्मा यस्तु स्वार्थे प्रमाद्यति।
दुर्लभं मानुषं देहं, प्राप्य तत्रापि पौरुषम् ।।

इति शङ्कराचार्यस्य उक्तिः । सत्यं हि तत्, मानवाः दुर्लभं देहं प्राप्य स्वार्थमेव सदा यतते। तेन मनुष्याणां पशूनां च को भेदः द्रष्टुं शक्नुयात्? । काकः अपि चञ्चवा उदरपूर्णं करोत्येव खलु। वस्तुतः जीवनं तु स्वस्य रक्षार्थमेव नास्ति। येन जीवनेन अन्येषामपि प्रयोजनं संभवति तदेव सार्थकं जीवनं भवति। तदेव अस्मिन् पाठ्यभागे कथारूपेण उपस्थाप्यते।।



एकस्मिन् नदी-तीरे एकः साधुः आश्रमम् अधिवसति स्म । प्रतिदिनं ते स्वकर्म समाप्य आश्रमम् आगतान् जनान् प्रति उपेदशमपि कुर्वन् आसीत् । तस्य साधोः उपदेशवचनं श्रुत्वा अनेके जनाः सदाचारेण सद्गतिं प्राप्तवन्तः ।

एतत् ज्ञात्वा एकः कृपणः मोक्षपदवीं प्राप्तुं वाञ्छन् तं साधुं दृष्ट्वा उपायम् अपृच्छत् । स साधुः कृपणं प्रत्यवदत् - "भवान् प्रतिदिनं दानं करोतु" इति । साधोः तद्वाक्यम् आकर्ण्य सः "तथैव करोमि" इति वचनं दत्त्वा आश्रमात् प्रस्थितवान् । गृहमागत्य प्रतिदिनम् एकमुष्टि तण्डुलं दरिद्राय अयच्छत् । एवम् एकसंवत्सरपर्यन्तं कृत्वा पुनः साधुं द्रष्टुं सः कृपणः आगतवान् । स्वदानक्रियां साधुं प्रति



Unit 10.indd 67 18-03-2019 12:25:53

अब्रवीत्। सः कृपणः “मम दानक्रियां श्रुत्वा साधुः मां प्रशंसेत्” इति मनसि अचिन्तयत् । किन्तु साधुः तूष्णीम् एव स्थितः आसीत्।

अथ साधुः एकस्य बृहद्वृक्षस्य समीपं गत्वा स्वनखेन तं वृक्षं चिच्छेद । तत् दृष्ट्वा कृपणः साधुं पृष्टवान् - “हे साधो! किं करोति भवान् ” इति । साधुः ‘वृक्षस्य छेदनं करोमि’ इति उत्तरम् उक्तवान् ।

ततः कृपणः “एतत् कथं साध्यम्” इति पुनः अपृच्छत् । तदा साधुः, यदि एकमुष्टितण्डुलदानेन मोक्षपदवी साध्या, तर्हि बृहद्वृक्षस्य छेदनमपि नखेन साध्यमेव इति उत्तरम् अदात् ।

साधुवचनात् कृपणस्य मनः परिवर्तितम् अभवत् । तद्दिनादारभ्य सः स्वधनं सर्वं निर्धनेभ्यः आर्तजनेभ्यः च प्रायच्छत् ।

श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिषु।
परोपकारः पुण्याय पापाय परपीडनम् ।।
परोपकाराय फलन्ति वृक्षाः परोपकाराय दुहन्ति गावः।
परोपकाराय वहन्ति नद्यः परोपकारार्थमिदं शरीरम् ।।

इत्यादि प्रेरणादायकान् श्लोकान् सुविज्ञाय तदनुगुणं “लोकहितं मम करणीयम्” इति स्वजीवनलक्ष्यं मनसि संस्थापितवान् । सदृढव्रतेन, वैराग्यचित्तेन च स्वलक्ष्यप्राप्त्यर्थम् अहोरात्रं परोपकारम् एव कुर्वन् कालयापनम् अकरोत् । व्याधिग्रस्थानां जनानां प्राणान् स्वरक्तदानेन अरक्षत्। अपि च “स्वमरणानन्तरमपि मद्देहः उपयोगकरः भवितव्यः” इति विचिन्त्य नेत्रदानम् अपि कृत्वा कृपणः कृपालुः अभवत् ।।

।। अहो साधुवचनप्रभावः ।।

## अभ्यासः

### I. कठिनशब्दार्थः-

1. प्रतिदिनम् - everyday
2. अनेके - many
3. उपायम् - means
4. कृपणः - miser



Unit 10.indd 68 18-03-2019 12:25:53

5. एकमुष्टि - handful of
6. संवत्सरः - year
7. दानक्रियाम् - act of charity
8. तूष्णीम् - quietly
9. चिच्छेद - cut
10. मोक्षपदवी - the abode of bliss
11. परिवर्तितम् - change

## II. समीचीनम् उत्तरं चिनुत-

1. साधोः आश्रमं कुत्र वर्तते ?
   (i) नदीतीरे (ii) वनान्तिके (iii) नगरे
2. साधुः कान् उपदिशत् ?
   (i) जनान् (ii) ऋषीन् (iii) देवान्
3. कः मोक्षपदवीं वाञ्छति स्म?
   (i) धनिकः (ii) कृपणः (iii) चोरः
4. साधुः किं प्रत्यवदत् ?
   (i) दानं करोतु (ii) रक्षां करोतु (iii) पापं करोतु
5. कृपणः कति वर्षपर्यन्तं दरिद्राय तण्डुलम् अयच्छत् ?
   (i) एकसंवत्सरम् (ii) चतुर्वषम् (iii) पञ्चवर्षम्
6. कृपणः कति तण्डुलं दरिद्राय अयच्छत् ?
   (i) एकमुष्टि (ii) बहुमुष्टि(iii) पञ्चमुष्टि
7. साधुः केन वृक्षं चिच्छेद ?
   (i) नखेन (ii) शिरेण (iii) मुखेन
8. परोपकाराय फलन्ति के ?
   (i) गावः (ii) वृक्षाः (iii) नद्यः
9. किमर्थं गावः दुहन्ति ?
   (i) परोपकाराय (ii) परापकाराय (iii) परनिन्दनाय



Unit 10.indd 69 18-03-2019 12:25:53

10. परोपकाराय नद्यः किं कुर्वन्ति ?

(i) दुहन्ति (ii) फलन्ति (iii) वहन्ति

11. कृपणः स्वमनसि किं संस्थापितवान्

(i) लोकहितं करणीयम् (ii) लोकापकारं करणीयम् (iii) लोकरक्षणं करणीयम्

12. कृपणः किं कृत्वा कृपालुः अभवत् ?

(i) नेत्रदानम् (ii) तण्डुलदानम् (iii) स्वर्णदानम्

## III. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. साधुः कुत्र अधिवसति स्म ?
2. साधुः जनान् किं कुर्वन् आसीत् ?
3. साधोः उपदेशं श्रुत्वा जनाः केन सद्गतिं प्राप्तवन्तः ?
4. साधुः किं कर्तुं कृपणम् आदिशत् ?
5. कृपणः किं प्राप्तुं साधुं दृष्ट्वा उपायम् अपृच्छत् ?
6. कृपणः गृहमागत्य प्रतिदिनम् एकमुष्टि तण्डुलं कस्मै अयच्छत्?
7. साधुः बृहद्वृक्षस्य समीपं गत्वा कथं तं वृक्षं चिच्छेद?
8. साधुवचनात् कस्य मनः परिवर्तितम् अभवत्?
9. कृपणस्य जीवनलक्ष्यं किम्?
10. व्याधिग्रस्थानां प्राणान् कथम् अरक्षत्?

## IV. सविस्तरम् उत्तरं लिखत-

1. साधुवचनं यथाग्रन्थं स्वभाषया लिखत ।

## V. रिक्तस्थानानि पूरयत-

1. आधुनिक पर्यावरणविज्ञानं __________ उद्भूतम् भवति।
2. अप्सु __________ न करणीयम् ।
3. प्रदूषणात् __________ पालनम् कर्तव्यमेव ।
4. ऋषिपत्न्यः __________ इव मृगान् अपालयन् ।
5. विविधोपायैः __________ आवश्यकम् ।

***********

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

आत्मार्थं जीवलोकेऽस्मिन् को न जीवति मानवः।
परं परोपकार्थं यो जीवति सजीवति।।

जीवितान्मरणं श्रेष्ठ परोपकृतिवर्जितात्।
मरणं जीवितं मन्ये यत्परोपकृतिक्षमन् ।।

तृणं चाहं वरं मन्ये नरादनुपकारिणः ।
घासो भूत्वा पशून्याति भीरुन् वाति रणांगणे।।

परोपकारशून्यस्य धिक् मनुष्यस्य जीवितम्।
जीवन्तु पशवो येषां चर्माप्युपकरिष्यति।।

रत्नाकरः किं कुरुते स्वरत्नैः विन्ध्याचलः किं करिभिः करोति।
श्रीखण्डखण्डैः मलयाचलः किं परोपकाराय सतां विभूतयः ।।

धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत्।
तन्निमित्तो वरं त्यागो विनाशे नियते सति।।

रविश्चन्द्रो घना वृक्षाः नदी गावश्च सज्जनाः।
एते परोपकाराय युगे दैवेन निर्मिता ।।

परोपकृति कैवल्ये तोलयित्वा जनार्दनः।
गुर्वीमुपकृतिं मत्वा ह्यवतारान् दशाग्रहीत्।

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ।।

Weblinks :

1. samskritsloka.com

2. https://shiveshpratal.com

3. susanskrit.org



Unit 10.indd 71 18-03-2019 12:25:53

## व्याकरण–अभ्यासः - 5

### मकारान्तः पुंलिङ्गः "किम्" शब्दः (who)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | कः | कौ | के |
| द्वितीया | कम् | कौ | कान् |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु |

### मकारान्तः स्त्रीलिङ्गः "किम्" शब्दः (who)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | का | के | काः |
| द्वितीया | काम् | के | काः |
| तृतीया | कया | काभ्याम् | काभिः |
| चतुर्थी | कस्यै | काभ्याम् | काभ्यः |
| पञ्चमी | कस्याः | काभ्याम् | काभ्यः |
| षष्ठी | कस्याः | कयोः | कासाम् |
| सप्तमी | कस्याम् | कयोः | कासु |

### मकारान्तः नपुंसकलिङ्गः "किम्" शब्दः (what)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | किम् | के | कानि |
| द्वितीया | किम् | के | कानि |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु |



Unit 10.indd 72 18-03-2019 12:25:54

## अनुच्छेदलेखनम् – 5

## (Comprehension – 5)



तेन्नालि रामकृष्णः नाम कश्चित् कविः आसीत् । कदाचित् केचित् चोराः तस्य गृहं प्रविश्य क्वचित् निलीय आसन् । तत् ज्ञात्वा सः कविः सर्वस्वमपि निगूढे निक्षिप्य चोरान् श्रावयितुं पत्नीं प्रति एवम् आह "अस्मिन् पुरे बहवः चोराः सन्ति । तस्मात् सर्वद्रव्यमपि अस्मिन् वापिकायां निक्षिपावः" इति । तदनन्तरं सः कविः एकां पेटिकां शिलाभिः संपूर्य वापिकायां पातयामास । शब्दमाकर्ण्य ते चोराः तद्धनं सर्वम् अपहर्तव्यम् इति मत्वा वापिकायाः अवतारयामासुः। तं पेटिकां द्रष्टुम् अशक्ताः तत्रस्थ जलानि उद्धर्तुम् अयतन्त। तेन्नालि रामः तेन जलेन उद्यानस्य आलवालानि अपूरयत् । प्रातः कालः अपि अजायत। जलैः अलम् अलम् इति कविः उच्चैः ननाद । तदाकर्ण्य चोराः भीताः द्रुतम् अधावन् ।

।। नीतिः – निपुणाः जनाः अहितप्रयत्नैः हितमेव संपादयन्ति ।।

प्रश्नाः-

1. कवेः नाम किम् ?
2. कवेः गृहे के निलीयन् आस्त ?
3. कविः स्वपत्नीं प्रति किमवदत् ?
4. कविः पेटिकाम् काभिः संपूर्य पातयामास ?
5. पेटिकाम् उद्धर्तुं चोराः किमकुर्वन् ?
6. अस्य गद्यांशस्य नीतिः का ?

## अनुवादः – 5

## (Translation - 5)



एकदा राजधानीं प्रति कश्चन सन्यासी आगतः । सः सर्वेषां प्रीतिपात्रः आसीत् । तद्देशस्य राजा तस्य कीर्तिं श्रुत्वा तं द्रष्टुं रत्नानि सुवर्णभूषणानि च स्वीकृत्य तस्य आश्रमं प्राप्तवान्। तत्समये सः सन्यासी जनान् उपदिशति स्म । सः राजागमनं जानन्नपि विशेषावस्था न दर्शितवान् । किञ्चित् कालानन्तरं जनाः गतवन्तः । प्रतीक्षारतः राजा उत्साहेन स्वेन आनीतानि वस्तूनि तत्पुरतः स्थापितवान् । किन्तु यतिः तानि न अङ्गीकृतवान् । प्रत्युत महाराज्ञे एकां रोटिकां दत्तवान् । परन्तु राजा तां खादितुं नैव शक्नोति स्म । रोटिकाम् अखादयित्वा एव स्वपार्श्वे स्थापितवान् । एतत् दृष्ट्वा सन्यासी अवदत् “महाराज! यथा एषा रोटिका भवते निरुपयोगी, तथैव भवता आनीता संपत्तिः मम अपि । यद् अस्मभ्यम् उपयोगी स्यात् तदेव ग्रहणीयम् ” इत्युक्त्वा तं विसर्जयति स्म ।



Unit 10.indd 74 18-03-2019 12:25:54

एकादशः पाठः 11

# Lesson 11
# अमृतवाणी

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ।।




धर्मो रक्षति रक्षितः इत्युक्तिः । भारते मुनयः राजानश्च धर्ममार्गेणैव कार्यम् आचरन्तः आसन् । अथ कः धर्मः इति प्रश्ने सर्वे स्व-स्व अभिप्रायं कथयन्ति । अतः धर्मजिज्ञासायाः समाधानार्थम् अस्माकं पूर्वजानां मतानुसारम् अस्मिन् पाठे धर्मस्य लक्षणं कथितं विद्यते ।

**धृतिः -**

रत्नैर्महाब्धैर्तुतुषुर्न देवाः
न भेजिरे भीमविषेण भीतिम् ।
सुधां विना न प्रययुर्विरामं
न निश्चितार्थाद्विरमन्ति धीराः ।

**क्षमा -**

क्षमाशस्त्रं करे यस्य दुर्जनःकिं करिष्यति।
अतृणे पतितो वह्निः स्वयमेवोपशाम्यति ।।

**दमः -**

आपदां कथितः पन्था इन्द्रियाणां असम्भवः
तज्जयः संपदां मार्गः येनेष्टं तेन गम्यताम् ।।

**अस्तेयम् -**

अनादानं परस्वानां आपद्यपि विचारतः ।
मनसा कर्मणा वाचा तदस्तेयं समासत।।



Unit 11.indd 75 18-03-2019 12:26:57

शौचम् -

दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेद्वाचं मनः पूतं समाचरेत् ।।

इन्द्रियनिग्रहः -

श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च
भुक्त्वा घ्रात्वा च यो नरः ।
न हृष्यति न ग्लायति वा
स विज्ञेयो जितेन्द्रियः।

धीः -

शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा।
ऊहापोहार्थविज्ञानं तत्वज्ञानं च धीगुणाः ।।

विद्या -

सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम् ।
अहार्यत्वादानर्घ्यत्वात् अक्षयत्वाच्च सर्वदा ।

सत्यम् -

अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
अश्वमेधसहस्रेभ्यो सत्यमेव विशिष्यते ।।

अक्रोधः -

क्रोधो मूलम् अनर्थानां
क्रोधो संसारबन्धनम् ।
धर्मक्षयकरः क्रोधः
तस्मात् क्रोधं परित्यज ।।



Unit 11.indd 76 18-03-2019 12:26:57

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

| | | |
|---|---|---|
| 1. धृतिः | - | fortitude |
| 2. क्षमा | - | forgiveness |
| 3. दमः | - | self control |
| 4. अस्तेयम् | - | non-stealing |
| 5. शौचम् | - | purity |
| 6. इन्द्रियनिग्रहः | - | control of senses |
| 7. शस्त्रम् | - | weapon |
| 8. पन्था | - | way |
| 9. शुश्रूषा | - | service |
| 10. तुला | - | balance |

### II. अधो निर्दिष्टानां पदानां विपरीतपदानि लिखत-

1. स्तेयम् × अस्तेयम्
2. क्रोधः × अक्रोधः
3. विना × सह
4. दुर्जनः × सज्जनः
5. जयः × अपजयः
6. संपदाम् × विपदाम्
7. सत्यम् × असत्यम्
8. अर्घम् × अनर्घम्
9. बन्धः ×मोक्षः
10. अर्थम् ×अनर्थम्

### III. अधो विद्यमानानां पदानां व्याकरणरूपं लिखत-

1. विरमन्ति – लट् लकारः, प्रथमपुरुषः, बहुवचनम् of रम् with वि to leave

2. करिष्यति – लृट् लकारः, प्रथमपुरुषः, एकवचनम् of कृ to do

3. उपशाम्यति – लट् लकारः, प्रथमपुरुषः, एकवचनम् of शम् with उप to suppress



Unit 11.indd 77 18-03-2019 12:26:57

4. पिबेत् – विधिलिङ्, प्रथमपुरुषः, एकवचनम् of पा – to drink.

5. वदेत् – विधिलिङ्, प्रथमपुरुषः, एकवचनम् of वद् – to speak

6. श्रुत्वा – त्वान्तम्, अव्ययम् of श्रु to hear

7. विना – अव्ययम्, meaning without

8. भुक्त्वा – त्वान्तम्, अव्ययम् of भुज् to eat

9. दृष्ट्वा – त्वान्तम्, अव्ययम् of दृश् to see

10. सर्वदा – अव्ययम्, meaning always.

## IV. यथोचितं सन्धिम् अथवा सन्धिविच्छेदं कुरुत-

1. दमोऽस्तेयम् - दमः + अस्तेयम्
2. धीर्विद्या - धीः + विद्या
3. निश्चितार्थद्विरमन्ति - निश्चितार्थात् + विरमन्ति
4. स्वयमेव - स्वयम् + एव
5. वदेद्वाचम् - वदेत् + वाचम्
6. विद्यैव - विद्या + एव
7. अक्षयत्वाच्च - अक्षयत्वात् + च
8. तज्जयः - तत् + जयः
9. येनेष्टम् - येन + इष्टम्
10. द्रव्यमाहुः - द्रव्यम् + आहुः

## V. अधो लिखितानां पदानां विग्रहं लिखत-

1. धर्मलक्षणं - धर्मस्य लक्षणम् ।
2. इन्द्रियनिग्रहः - इन्द्रियाणां निग्रहः ।
3. अक्रोधः - न क्रोधः ।
4. अतृणे - न तृणं तस्मिन् ।



Unit 11.indd 78 18-03-2019 12:26:57

5. असम्भवः - न संभवः ।

6. अस्तेयम् - न स्तेयम् ।

7. वस्त्रपूतं - वस्त्रेण पूतम् ।

8. क्षयकरः - क्षयं करोति इति ।

9. क्षमाशस्त्रं - क्षमा एव शस्त्रम् ।

10. जितेन्द्रियः - जितम् इन्द्रियं येन, सः

## VI. अधः प्रदत्तानां शब्दानां पर्यायपदानि लिखत-

| | | | | | |
|---|---|---|---|---|---|
| 1. धीः | - | बुद्धिः | 2. शौचम् | - | पवित्रम् |
| 3. सत्यम् | - | ऋतम् | 4. क्रोधः | - | कोपः |
| 5. भीतिः | - | भयम् | 6. वह्निः | - | अग्निः |
| 7. सुधा | - | अमृतम् | 8. पन्था | - | मार्गः |
| 9. नरः | - | मनुष्यः | | | |

## VII. समीचीनम् उत्तरं चिनुत-

1. धर्मस्य लक्षणानि कति ?

(i) दश (ii) पञ्च (iii) सप्त

2. देवाः कां विना न प्रययुः ?

(i) सुधाम् (ii) विषम् (iii) क्षीरम्

3. अतृणे पतितः कः स्वयमेव उपशाम्यति ?

(i) वह्निः (ii) अनिलः (iii) वर्षः

4. कीदृशं जलं पिबेत् ?

(i) दृष्टिपूतम् (ii) सत्यपूतम् (iii) वस्त्रपूतम्



Unit 11.indd 79 18-03-2019 12:26:57

5. कः न हृष्यति न ग्लायति ?

(i) जितेन्द्रियः (ii) दुष्टः (iii) हृष्टः

6. सर्वद्रव्येषु का अनुत्तमा ?

(i) विद्या (ii) धनम् (iii) यशः

7. कः अनर्थानां मूलम् ?

(i) क्रोधः (ii) धनम् (iii) कीर्तिः

8. क्रोधः कस्य क्षयकरः ?

(i) ज्ञानस्य (ii) धर्मस्य (iii) शरीरस्य

9. कथं कार्यं समाचरेत् ?

(i) सत्यपूतम् (ii) वस्त्रपूतम् (iii) मनःपूतम्

## VIII. अधो दत्तानां प्रश्नानाम् उत्तरं लिखत -

1. धर्मस्य लक्षणानि कानि ?
2. धीराः कस्मात् न विरमन्ति ?
3. कैः अस्तेयं समाचरणीयम् ?
4. कदा वह्निः स्वयमेव उपशाम्यति ?
5. कथं पादं न्यसेयम् ?
6. कीदृशं जलं पातव्यम् ?
7. कीदृशीं वाचं वदेत् ?
8. कः जितेन्द्रियः ?
9. धीर्गुणाः के?
10. विद्या कथम् अनुत्तमा भवति ?

## IX. सविस्तरमुत्तरं लिखत ।

1. धर्मलक्षणेषु लक्षणत्रयं व्याख्यात ।
2. अमृतवाणी इति पाठात् यथेष्टं धर्मस्य त्रीन् गुणान् विवृणुत ।

***********



Unit 11.indd 80 18-03-2019 12:26:57

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

संस्कृतसाहित्ये बहवः नीतिग्रन्थाः सन्ति । तेषु कतिपयेषां नीतिग्रन्थकर्तॄणां परिचयः अत्र प्रदीयन्ते।

### विदुरः -

महात्मा विदुरः साक्षात् धर्मस्य अवतारः आसीत् । माण्डव्यऋषेः शापेन एषः नरजन्म प्राप्तवान् । एषः धृतराष्ट्रस्य पाण्डोः च भ्राता एव । एषः बुद्धिमान्, नीतिज्ञः, धर्मज्ञः, विद्वान्, सदाचारी, भगवत्भक्तः च आसीत् । तस्य वचनानि सत्य, धर्म, हित, नीतिभरितानि सन्ति ।

कदाचित् रात्रौ धृतराष्ट्रस्य निद्रा न आगता । तदा सः रात्रौ एव विदुरम् आहूय शान्तेः उपायं पृष्टवान् । तस्मिन् अवसरे विदुरः धृतराष्ट्राय धर्मस्य नीतेः च समीचीनम् उपदेशं दत्तवान् । तदेव विदुरनीतिः इति नाम्ना उद्योगपर्वणः 33 तः 40 पर्यन्तम् अष्टसु अध्यायेषु सङ्गृहीतो अस्ति ।

### चाणक्यः -

चाणक्यः मौर्यवंशस्थापकः चंद्रगुप्तस्य मन्त्री, सहायकः च आसीत्। सः कौटिल्यः, विष्णुगुप्तः इति नामाभ्याम् अपि प्रसिद्धः आसीत्। सः प्राचीनभारतस्य प्रसिद्धतमः कूटनीतिज्ञः अभवत् । तस्य साहाय्येन एव चन्द्रगुप्तेन नन्दराज्यम् अवस्थापितम्, मौर्यवंशः स्थापितः च । चाणक्यः प्रसिद्धः अर्थशास्त्रग्रन्थस्य लेखको आसीत् । राजनीत्यां तस्य नीतिः चाणक्यनीतिः इति नाम्ना प्रसिद्धा अस्ति।

### हितोपदेश परिचयः -

हितोपदेशः व्यावहारिक-नैतिक-राजनैतिकज्ञानेपूर्णः लघुकथानां हृदयग्राही सङ्ग्रहः च अस्ति। हितोपदेशः पञ्चतन्त्रस्य परिष्कृता काचित् आवृत्तिः चेदपि स्वतन्त्रग्रन्थत्वेन एव तस्य ख्यातिः अस्ति। हितोपदेशस्य रचयिता नारायणपण्डितः। एषः वङ्गदेशीयः। यद्यपि पञ्चतन्त्रस्य आधारेण एषः ग्रन्थः अरचयत्, तथापि अन्यग्रन्थेभ्यः अपि अत्र कथाः स्वीकृताः सन्ति । तद्यथा - महाभारतात् स्वीकृता मुनिमूषककथा, वेतालपञ्चविंशतितः स्वीकृता वीरवरकथा इत्याद्यः। ग्रन्थोऽयं कथादृष्ट्या चतुर्षु भागेषु विभक्तोऽस्ति । यथा - मित्रलाभः, सुहृद्भेदः सन्धिः, विग्रहः च इति ।



Unit 11.indd 81 18-03-2019 12:26:58

द्वादशः पाठः 12

# Lesson 12
# संस्कृते विज्ञानम्

अस्माकं पूर्वजाः भौतिक, सस्य, रसायनादिषु शास्त्रेषु चतुराः आसन्। अयं पाठः अस्माकं विज्ञानपरम्परायाः वैशिष्ट्यं प्रकटयति।



भारतस्य संस्कृतिः अति प्राचीना। न केवलं संस्कृतेः वर्धनाय संस्कृतभाषायाः भागः अतीव विद्यते। अपि तु पुरातन, आधुनिक - विज्ञानस्य पोषणाय अपि विद्यते । विज्ञानमपि एकं शास्त्रम् इत्येव अस्माभिः मन्यते । विज्ञाने विविधाः शाखाः वर्तन्ते। ताः संस्कृतभाषायां सूत्ररूपेण एवं श्लोकरूपेण अस्माकं पूर्वजैः रचिताः । तत्र बहवः विज्ञानग्रन्थाः अधुनापि उपलभ्यन्ते ।

तत्र शिल्पशास्त्रे केचन ग्रन्थाः विद्यन्ते । तेषु ग्रन्थेषु आलयनिर्माणं, ग्रामनगरनिर्माणं, शिलादि विग्रहकरणं च विवरीकृतानि । शिल्पशास्त्रं ज्ञातुं गणितस्य ज्ञानम् आवश्यकं भवति । समग्रे विश्वे इदं शास्त्रमनुसृत्यैव अद्यापि देवालयाः निर्मीयन्ते ।

आयुर्वेदः आरोग्येन जीवितुं मार्गं प्रदर्शयति। स्वास्थ्य - जीवनाय आहार, औषध, शरीरादीनां ज्ञानम् आवश्यकम् । एतान् विषयान् चरकसंहिता, अष्टाङ्गहृदयादि ग्रन्थाः बोधयन्ति ।



Unit 12.indd 82 18-03-2019 12:28:01

सुश्रुतः इति कश्चन पुरातन वैद्यः । सः शस्त्रचिकित्सायां निपुणः। तेन लिखितस्य ग्रन्थस्य नाम सुश्रुतसंहिता इति। एषः सुनम्यशस्त्रचिकित्सायां चतुरः । एतस्मात् कारणात् एषः तच्छास्त्रस्य जनकः इति श्रूयते।

आर्यभट्टः खगोलशास्त्रे निपुणः । तेन लिखितस्य ग्रन्थस्य नाम आर्यभट्टीयम् इति । अस्मिन् ग्रन्थे ग्रहसंचार, चन्द्र–सूर्यग्रहणादि विषयाः विस्तृताः सन्ति । खगोलशास्त्रं प्रति आर्यभट्टस्य अनर्घयोगानं योगदानं स्मर्तुं – भारतीय – अन्तरिक्ष - अनुसंधान - सङ्घटेन (ISRO) निर्मितः प्रथमः उपग्रहः "आर्यभट्ट" इति नाम्ना व्यपदिष्टः आसीत् । आर्यभट्टस्य अनुयायिनः भास्कराचार्यः, ब्रह्मगुप्तः एवं वराहमिहिरः च । एकैकोऽपि गणितशास्त्रे निपुणः आसीत् ।

भरद्वाजः स्वस्य वैमानिकशास्त्रे विविध – विमान - यानानां निर्माणविषयम् अधिकृत्य स्पष्टतया प्रतिपादितवान् । एवं भास्कराचार्यः स्वस्य लीलावती इति ग्रन्थे बीजगणितं व्याख्यातवान् । एवं च वराहमिहिरस्य स्वस्य बृहत्संहितायाम् वैज्ञानशब्दकोशः दृश्यते । आधुनिक गणिनी विषयेऽपि पाणिनीयपन्थाम् अनुसृत्य आधुनिकविज्ञानिनः प्रयत्नं कुर्वन्ति । अतः एतेन संस्कृते यत् विज्ञानं पूर्वाचार्यैः अन्विष्टं, तदेव आधुनिककाले प्रशोभमानं दृश्यते ।

## अभ्यासः

### I. कठिनशब्दार्थः-

1. संस्कृतिः - culture
2. शाखाः - branch
3. शिल्पशास्त्रम् - architecture
4. विज्ञानशास्त्रम् - science
5. स्वास्थ्यम् - health
6. औषधम् - medicine
7. वैद्यः - physician
8. खगोलशास्त्रम् - astronomy
9. ग्रहणम् - an eclipse
10. अनुयायिनः - followers
11. सुनम्यशास्त्रम् - plastic surgery
12. पुरातनः - ancient
13. ग्रहः - planet



Unit 12.indd 83 18-03-2019 12:28:01

## II. समीचीनम् उत्तरं चिनुत-

1. भारतस्य संस्कृतिः ________ भवति?

   (i) अति प्राचीना (ii) अति नूतना (iii) अतिन्यूनता

2. अस्माकं पूर्वजाः विज्ञानविषयेषु ________ आसन्।

   (i) मन्दाः (ii) चतुराः (iii) सामान्याः

3. आलयनिर्माणं कस्मिन् शास्त्रे विद्यते ?

   (i) न्यायशास्त्रे (ii) धर्मशास्त्रे (iii) शिल्पशास्त्रे

4. शिल्पशास्त्रं ज्ञातुं कस्य ज्ञानम् आवश्यकम् ?

   (i) गणितस्य (ii) वैदिकस्य (iii) लौकिकस्य

5. अष्टाङ्गहृदयादि ग्रन्थाः किं बोधयन्ति?

   (i) धनज्ञानम् (ii) शरीरज्ञानम् (iii) पुस्तकज्ञानम्

6. शस्त्रचिकित्सायां निपुणः पुरातन वैद्यः कः?

   (i) सुश्रुतः (ii) चरकः (iii) वाग्भटः

7. खगोलशास्त्रस्य प्रसिद्धः आचार्यः कः ?

   (i) वागीशः (ii) विक्रमादित्यः (iii) आर्यभट्टः

8. भारतीय - अन्तरिक्ष - अनुसंधान - सङ्घटेन निर्मितः प्रथमः उपग्रहः कः ?

   (i) भास्कारः (ii) आर्यभट्टः (iii) इन्द्रयानम्

## III. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. भारतस्य संस्कृतिः कीदृशी ?
2. विज्ञाने कति शाखाः वर्तन्ते ?
3. कस्मिन् शास्त्रे आलयनिर्माणादिकं विवृतम् ?
4. शिल्पशास्त्रविषयं ज्ञातुं कस्य ज्ञानम् आवश्यकम्?
5. आरोग्येन जीवितुं कः मार्गं दर्शयति ?
6. स्वास्थ्यजीवनाय केषां ज्ञानम् आवश्यकम्?
7. आर्यभट्टेन विरचितस्य ग्रन्थस्य नाम किम्?
8. सुश्रुतेन रचितस्य ग्रन्थस्य नाम किम्?
9. सुश्रुतः कस्मिन् विषये निपुणः?
10. के आर्यभट्टस्य अनुयायिनः?

## IV. सविस्तरम् उत्तरत-

1. भारतस्य विज्ञानपरम्परायाः वैशिष्ट्यं यथाग्रन्थं लिखत।
2. विज्ञाने संस्कृतज्ञानां योगदानं किमिति विवृणुत।

## V. योजयत

| क्रं.सं | ग्रन्थकर्ता | ग्रन्थ |
|---|---|---|
| 1. | सुश्रुतः | लीलावती |
| 2. | आर्यभट्टः | वैमानिकशास्त्रम् |
| 3. | भरद्वाजः | सुश्रुतसंहिता |
| 4. | भास्कराचार्यः | बृहत्संहिता |
| 5. | वराहमिहिरः | खगोलशास्त्रम् |

***********

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

ग्रहणविषये बृहत्संहितायां वराहमिहिराचार्येण उक्तम् –
भूछायां स्वग्रहणे भास्करमर्कग्रहे प्रविशतीन्दुः ।
प्रग्रहणमतः पश्चान्नेन्दोर्भानोश्च पूर्वार्धात् ।।
राज्ञः विक्रमादित्यस्य सभायां स्थितेषु नवसु रत्नेषु अन्यतमः वराहमिहिरः ।
धन्वन्तरिः क्षपणकामरसिंहशङ्कुः
वेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ।।

| | | |
|---|---|---|
| धन्वन्तरि : | - | वैद्यः |
| क्षपणकः | - | फलज्योतिर्वित्अ |
| मरसिंहः | - | कोषकारः |
| शङ्कुः | - | भूमापनशास्त्रज्ञः |
| वेतालभट्ट | - | मन्त्रशास्त्रज्ञः |
| घटकर्परः | - | शिल्प शास्त्रज्ञः |
| कालिदासः | - | कविः |
| वराहमिहिरः | - | ज्योतिश्शास्त्रज्ञः |
| वररुचिः | - | वैयाकरणः |

महाभारते विज्ञानम् -

रसायनशास्त्रम् -

रसायनविदश्चैव सुप्रयुक्तरसायनाः ।
दृश्यन्ते जरया भग्ना नगा नागैरिवोत्तमैः।।
यथा तिलानामिह पुष्पसंश्रयात् पृथक् पृथग्याति गुणोऽतिसौम्यताम् ।
तथा नराणां भुवि भावितात्मनां यथाश्रयं सत्त्वगुणाः प्रवर्तन्ते ।।



Unit 12.indd 85 18-03-2019 12:28:01

## आदित्यमणिः (Lens) -

यथादित्यान्मणेश्चापि वीरुधश्चैव पावकः।
जायन्त्येवं समुदायात् कलानामिव जन्तवः ।।

विद्युत् (Electricity) -

एवमुक्त्वा जहासोच्चैः केशवः परवीरहा।
तस्य संस्मयतः शौरेः विद्युद्रूपा महात्मनः ।।
अङ्गुष्ठमात्राः त्रिदशाः मुमुचुः पावकार्चिषः।

## विद्युत् (Electricity) -

एवमुक्त्वा जहासोच्चैः केशवः परवीरहा।
तस्य संस्मयतः शौरेः विद्युद्रूपा महात्मनः ।।
अङ्गुष्ठमात्राः त्रिदशाः मुमुचुः पावकार्चिषः।

## संस्कृते विज्ञानग्रन्थाः

| ग्रन्थः | ग्रन्थकर्ता |
|---|---|
| नामार्थकल्पकम् | अत्रिः |
| विमानचन्द्रिका | महर्षिः नारायणः |
| व्योमयानतन्त्रम् | शौनकमहर्षिः |
| यन्त्रकल्पः | गार्गः |
| यानबिन्दुः | वाचस्पतिः |
| खटेयानप्रदीपिका | चाक्रायनिः |
| अर्कप्रकाशिका | धुडीनाथः |
| रहस्य लहरी | आचार्यः लाल्ला |
| शक्तितन्त्रम् | अगस्त्यः |
| प्रपञ्चलहरी | महर्षिः वसिष्ठः |

**Weblinks :**

1. https://www.publicationsdivision.nic.in
2. https://sanskritdocuments.org
3. www.iitic.ac.in
4. www.iisc.ernet.in

## व्याकरण–अभ्यासः - 6

धातुः – आत्मनेपदी - लोट्  (Imperative mood)

भू (भव्) to be

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | सेवताम् | सेवेताम् | सेवन्ताम् |
| मध्यमपुरुषः | सेवस्व | सेवेथाम् | सेवध्वम् |
| उत्तमपुरुषः | सेवै | सेवावहै | सेवामहै |

यत् – to try

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | यतताम् | यतेताम् | यतन्ताम् |
| द्वितीया | यतस्व | यतेथाम् | यतध्वम् |
| तृतीया | यतै | यतावहै | यतामहै |

मुद् (मोद्) – to rejoice

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | मोदताम् | मोदेताम् | मोदतन्ताम् |
| द्वितीया | मोदस्व | मोदेथाम् | मोदध्वम् |
| तृतीया | मोदै | मोदावहै | मोदामहै |



Unit 12.indd 87 18-03-2019 12:28:02

## अनुच्छेदलेखनम् – 6

## (Comprehension – 6)



कस्मिंश्चित् तपोवने महातपा नाम मुनिः आसीत् । सः एकदा आश्रमसन्निधाने काकमुखात् भ्रष्टः मूषिकशाबकम् अपश्यत् । सः दयया नीवारकणैः संवर्धितः । तं मूषिकं खादितुम् एकः बिडालः प्रयत्नम् अकरोत् । ततो भीतः मूषिकः मुनेः प्रभावात् बिडालत्वेन परिर्वतितः । सः बिडालः कुक्कुरात् बिभेति स्म । ततः असौ कुक्कुरः कृतः । सोऽपि व्याघ्रात् अबिभ्यत । ततः असौ व्याघ्रः कृतः । तत्रत्याः मुनिगणाः “अनेन मुनिना मूषिकः अयं व्याघ्रतां नीतः ” इति अवदन् । एतत् श्रुत्वा व्याघ्रः यावदयं मुनिः जीविष्यति तावत् मम रूपस्य कीर्तनम् न भवेत् इति समालोच्य तं मुनिं हन्तुम् ऐच्छत् । तस्य मनोवृत्तिं ज्ञात्वा सः मुनिः तं पुनः “मूषिको भव” इति अशपत् ।

।। नीतिः - नीचः श्लाघ्यपदं प्राप्य स्वामिनं हन्तुमिच्छति ।।

प्रश्नाः-

1. मुनिः आश्रमसन्निधाने किम् अपश्यत् ?
2. मूषिकं खादितुं कः प्रयत्नम् अकरोत् ?
3. आश्रमस्थ - मुनिगणाः किम् अवदन् ?
4. व्याघ्रः किं कर्तुम् ऐच्छत् ?
5. मुनिः व्याघ्रं किम् अशपत् ?
6. अस्य गद्यांशस्य नीतिः का ?



Unit 12.indd 88 18-03-2019 12:28:02

## अनुवादः – 6
## (Translation - 6)



चोलदेशे सुशीलो नाम कश्चन पुरुषः बभूव। तस्य एकः शिशुः आसीत्। सः पुरुषः स्वशिशुं नकुलं च प्रीत्या अपोषयत्। तस्य पत्नी नकुलं स्वशिशुम् इव अमन्यत। नकुलोऽपि तयोः शिशुं सहोदरमिव मानयन् सदा तस्य हितमेव समाचरन् आसीत्। एकदा तत्पत्नी शिशुं डोलायां शाययित्वा नकुलं तद्रक्षणाय नियम्य च जलम् आनेतुं तटाकम् अगच्छत्। तदानीं कश्चित् कृष्णसर्पः तत्र आगतः। डोलासमीपमागतं तं सर्पं नकुलः खण्डयामास। मार्गे सा तद्विषयसूचनाय आगतं रक्तादिग्धमुखं नकुलं दृष्ट्वा शिशोः अनिष्टम् आशङ्क्य क्रोधेन नकुलं मारयामास। अथ गृहम् आगत्य डोलायां सुखेन शयानं सुतं, खण्डितं सर्पं च दृष्ट्वा दुःखिता अभूत्।

अत एव उच्यते - अपरीक्ष्य न कर्तव्यं, कर्तव्यं सुपरीक्षितम्।



Unit 12.indd 89 18-03-2019 12:28:02

त्रयोदशः पाठः 13

# Lesson 13
# अलङ्कारः

अलङ्करोति इति अलङ्कारः। शरीरालंकृतिसाधनानि अलङ्कारशब्देन उच्यन्ते। यथा शरीरस्य कुण्डल-कटक-हार-केयूराः अलङ्काराः भवन्ति, तथा काव्यशरीरस्य उपमा, उल्लेखादयः अलङ्काराः भवन्ति। येन प्रकारेण लोके अलङ्कृताः मनुष्याः उत्कृष्टाः मन्यन्ते, तेनैव प्रकारेण अलङ्कारैः समन्वितानि काव्यानि अपि समुत्कृष्टानि भवन्ति। तादृशः अलङ्कारः शब्दालङ्कारः (अनुप्रासादयः) अर्थालङ्कारः (उपमादयः) इति द्विविधाः।

**ग्रन्थपरिचयः-**

अलङ्कारशास्त्रेषु श्री जयदेवविरचितः "चन्द्रालोकः" इत्ययं ग्रन्थः सुप्रसिद्धः। तत्र दशमयूखाः सन्ति। अयं पाठ्यभागः तस्मात् पञ्चममयूखात् स्वीकृतः। अत्र कतिपयाः अलङ्काराः प्रदीयन्ते।

**उपमा -**

उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः।
हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते ॥ 1

**उल्लेखः -**

बहुभिर्बहुधोल्लेखात् एकस्योल्लेख इष्यते।
स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः ॥ 2

**काव्यलिङ्गः -**

स्यात् काव्यलिङ्गं वागर्थो नूतनार्थसमर्पकः।
जितोऽसि मन्द कन्दर्प मच्चित्तेऽस्ति त्रिलोचनः ॥ 3

**व्यतिरेकः -**

व्यतिरेको विशेषश्चेदुपमेयोपमानयोः।
शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः ॥ 4



Unit 13.indd 90 18-03-2019 12:29:27

### अर्थान्तरन्यासः -

भवेदर्थान्तरन्यासः अनुषक्तार्थान्तराभिधा।
हनुमानब्धिमतरत् दुष्करं किं महात्मनाम् ।। 5

### स्वभावोक्तिः -

स्वभावोक्तिः स्वभावस्य जात्यादिषु च वर्णनम् ।
कुरङ्गैरुत्तरङ्गाक्षि स्तब्धकर्णैरुदीक्ष्यते ।। 6

### व्याजस्तुतिः -

उक्तिर्व्याजस्तुतिः निन्दास्तुतिभ्यां स्तुतिनिन्दयोः ।
कस्ते विवेको नयसि स्वर्गं पातकिनोऽपि यत् ।। 7

### कविपरिचयः

चन्द्रालोकस्य रचयिता आचार्यः जयदेवः। अस्य कालः 13 शतं इति ज्ञायते । अयं पीयूषवर्ष नाम्ना व्यपदिश्यते । अस्य पिता महादेवः, माता सुमित्रा । अनेन विरचितः अन्यः ग्रन्थः "प्रसन्नराघवम्" इति नाटकम् ।

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. हंसी - female swan
2. कीर्तिः - fame
3. अर्थिभिः - by the beggars
4. कालः - God of death
5. त्रिलोचनः - Lord Siva
6. शैलाः - mountains
7. अब्धिः - ocean
8. कुरङ्गः - deer
9. कन्दर्पः - God of love
10. वर्णनम् - description



Unit 13.indd 91 18-03-2019 12:29:27

## II. अधो निर्दिष्टानां पदानां विपरीतपदानि लिखत-

| | | | | | |
|---|---|---|---|---|---|
| 1. कीर्तिः | × | अपकीर्तिः | 2. कोमलः | × | कठोरः |
| 3. महात्मभिः | × | दुरात्मभिः | 4. शत्रुः | × | मित्रम् |
| 5. बहुधा | × | एकधा | 6. विवेकः | × | अविवेकः |
| 7. स्तुतिः | × | निन्दा | | | |

## III. अधो विद्यमानानां पदानां व्याकरणरूपं लिखत-

1. स्यात् - विधिलिङ्, प्रथमपुरुषः, एकवचनम् of अस् to be.
2. अस्ति - लट् लकारः, प्रथमपुरुषः, एकवचनम् of अस् to be
3. भवेत् - विधिलिङ्, प्रथमपुरुषः, एकवचनम् of भू to be
4. असि - लट् लकारः, मध्यमपुरुषः, एकवचनम् of अस् to be
5. नयसि - लट् लकारः, मध्यमपुरुषः, एकवचनम् of नी to bring
6. अतरत् - लङ् लकारः, प्रथमपुरुषः, एकवचनम् of तृ (तर्) to cross
7. यत्र - अव्ययम् , meaning where
8. किन्तु - अव्ययम्, meaning but

## IV. यथोचितं सन्धिम् अथवा सन्धिविच्छेदं कुरुत-

1. लक्ष्मीरुल्लसति - लक्ष्मीः + उल्लसति
2. नूतनार्थ - नूतन + अर्थ
3. हंसीव - हंसी + इव
4. मच्चित्ते - मत् + चित्ते
5. बहुधोल्लेखात् - बहुधा + उल्लेखात्
6. विशेषश्चेत् - विशेषः + चेत्
7. इवोन्नताः - इव + उन्नताः
8. शत्रुभिरैक्षि - शत्रुभिः + ऐक्षि



Unit 13.indd 92 18-03-2019 12:29:27

9. जितोऽसि - जितः + असि
10. कस्ते - कः + ते

## V. अधो लिखितानां पदानां विग्रहं लिखत-

1. महात्मनाम् - महान् आत्मा येषां ते, तेषाम्
2. त्रिलोचनः - त्रीणि लोचनानि यस्य, सः
3. अर्थान्तरम् - अन्यः अर्थः, तम्
4. सादृश्यम् - सदृशस्य भावः
5. प्रकृतिकोमलाः - प्रकृत्या कोमलाः
6. वागर्थः - वाचः अर्थः
7. नूतनार्थः - नूतनः अर्थः

## VI. अधः प्रदत्तानां शब्दानां समानार्थकं पदं लिखत-

1. कीर्तिः – यशः
2. कन्दर्पः – मन्मथः
3. कालः – यमः
4. शत्रुः – रिपुः
5. शैलः – पर्वतः
6. त्रिलोचनः – शिवः
7. अर्थिनः – याचकाः
8. मन्दः – मूढः
9. अब्धिः – समुद्रः
10. कोमलः – मृदुः

## VII. समीचीनम् उत्तरं चिनुत-

1. यत्र द्वयोः सादृश्यं वर्ण्यते तत्र ________
   (i) उल्लेखः (ii) उपमा (iii) व्यतिरेकः

2. कृष्णस्य कीर्तिः कामिव स्वर्गङ्गामवगाहते?
   (i) हंसीव (ii) मयूरीव (iii) शुकमिव

3. श्रीकृष्णः शत्रुभिः कथमिव दृष्टः?
   (i) देवः (ii) कालः (iii) कामः

4. काव्यलिङ्गे वागर्थः कीदृशः?
   (i) नूतनार्थसमर्पकः (ii) पुरातनार्थसमर्पकः (iii) समानार्थसमर्पकः

5. गङ्गा कान् स्वर्गं नयति?
   (i) बुद्धिमतः (ii) पातकिनः (iii) व्यापारिणः



Unit 13.indd 93 18-03-2019 12:29:27

6. सज्जनाः ___________ इव उन्नताः भवन्ति ।

(i) शैलाः (ii) वृक्षाः (iii) शिखराः

7. हनुमान् किम् अतरत्?

(i) आकाशम् (ii) पर्वतम् (iii) अब्धिम्

8. सतां स्वाभावः कीदृशः ?

(i) सामान्यः (ii) कोमलः (iii) कठिनः

9. यत्र जात्यादिषु वर्णनं क्रियते तत्र ________ अलङ्कारः

(i) स्वभावोक्तिः (ii) उल्लेखः (iii) उपमा

10. यत्र निन्दास्तुत्योः तथा स्तुतिनिन्दयोः वर्णनं क्रियते तत्र _______

(i) काव्यलिङ्गः (ii) उल्लेखः (iii) व्याजस्तुतिः

## VIII. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. उपमालङ्कारस्य लक्षणं किम्?
2. उपमालङ्कारस्य उदाहरणं लिखत ।
3. उल्लेखालङ्कारस्य उदाहरणं किम् ?
4. जितोऽसि मन्द कन्दर्प ! - कथम्?
5. सन्तः कीदृशः इव उन्नताः ?
6. व्याजस्तुति - अलङ्कारस्य उदाहरणं लिखत।
7. अर्थान्तरन्यासालङ्कारस्य लक्षणं किम् ?

## IX. सविस्तरम् उत्तरं लिखत-

1. अलङ्कारत्रयं यथाग्रन्थं व्याख्यात ।
2. जयदेवेन विरचितात् चन्द्रालोकात् पाठानुसारं यथेष्टं त्रीन् अलङ्कारान् विशदयत ।

***********



Unit 13.indd 94 18-03-2019 12:29:27

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

जयदेवः स्वस्य ग्रन्थे -

चन्द्रालोकमयं स्वयं
वितनुते पीयूषवर्षः कृती (1.2)

इत्युक्तत्वात् पीयूषवर्ष इति नाम जयदेवस्य एव इति स्फुटी भवति । अपि च -

महादेवः सत्र प्रमुखमखविद्यैकचतुरः
सुमित्रा तद्भक्ति प्राणिहितमतिः यस्य पितरौ ।
अनेनासावद्यः सुकविजयदेवेन रचिते
चिरं चन्द्रालोके सुखयतु मयूखः सुमनसः ।। (1-16)

इत्ययं श्लोकः ग्रन्थस्य (चन्द्रालोक) प्रत्येकमयूखस्य अन्ते लिखितः भवति ।
अलङ्काराः काव्य शरीरस्य हारादिवत् भूषणानि भवन्ति । तादृशकाव्यस्य सामान्यलक्षणानि -

i. शब्दार्थौ सहितौ काव्यम् (काव्यालङ्कारः)
ii. वाक्यं रसात्मकं काव्यम् (साहित्यदर्पणम्)
iii. अदौषौ सगुणौ सालङ्कारौ च शब्दार्थो काव्यम् (काव्यनुशासनाम्)
iv. रमणीयार्थप्रतिपादकः शब्दः काव्यम् (रसगङ्गाधरः)
v. काव्यस्यात्मा ध्वनिः । (ध्वन्यालोकः)
शब्दार्थौ शरीरम् तावत् काव्यम् ।
vi.गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ ।
गद्यपद्योभयमयं काव्यं काव्यविदो विदुः (प्रतापरुद्रीयम्)

| ग्रन्थः | ग्रन्थकर्ता |
|---|---|
| यन्त्रकल्पः | गार्गः |
| यानबिन्दुः | वाचस्पतिः |
| खटेयानप्रदीपिका | चाक्रायनिः |
| अर्कप्रकाशिका | धुडीनाथः |
| रहस्य लहरी | आचार्यः लाल्ला |
| शक्तितन्त्रम् | अगस्त्यः |
| प्रपञ्चलहरी | महर्षिः वसिष्ठः |



Unit 13.indd 95 18-03-2019 12:29:28

काव्यशरीरम् -

शब्दार्थौ मूर्तिराख्यातौ जीवितं व्यङ्ग्यवैभवम् ।
हारादिवदलङ्काराः तत्र स्युः उपमादयः ।।

काव्यसामग्री -

श्लेषादयो गुणास्तत्र शौर्यादयादय इव स्थिताः।
आत्मोत्कर्षावहास्तत्र स्वभावाः इव रीतयः ।।
शोभामाहार्यिकी प्राप्ता वृत्तयो वृत्तयो यथा।

संस्कृते बहवः आलङ्कारिकग्रन्थाः सन्ति । ते -

| अलङ्कारग्रन्थः | रचयिता |
|---|---|
| काव्यादर्शः | दण्डिः |
| रसगङ्गाधरः | जगन्नाथपण्डितः |
| कुवलयानन्दः | अप्पय्यदीक्षितः |
| काव्यप्रकाशः | मम्मटः |
| काव्यालङ्कारः | भामः |
| ध्वन्यालोकः | आनन्दवर्धनः |
| काव्यमीमांसा | राजशेखरः |
| काव्यप्रदीपः | महामहोपाध्यायः गोविन्दः |
| शक्तितन्त्रम् | अगस्त्यः |
| प्रपञ्चलहरी | महर्षिः वसिष्ठः |

द्रविडग्रन्थे अपि अयं अलङ्कारः (அணி இலக்கணம்) “अणि इलक्कणम्” इति नाम्ना व्यपदिश्यते।

**Weblinks :**

1. https://www.publicationsdivision.nic.in
2. https://sanskritdocuments.org
3. www.iitic.ac.in
4. www.iisc.ernet.in



Unit 13.indd 96 18-03-2019 12:29:28

# चतुर्दशः पाठः 14

## Lesson 14
## गुणत्रयम्

वेदानां चत्वारः भागाः – संहिता, ब्राह्मणम्, आरण्यकम्, उपनिषदः इति।

वेदभागानां अन्ते तिष्ठन्ति इत्यतः उपनिषदां 'वेदान्तः' इत्यपि नाम । उपनिषदः शताधिकाः भवन्ति। तासु दश उपनिषदः लोके प्रसिद्धाः प्रधानाः च सन्ति।

तासु बृहदारण्यकोपनिषद् अन्यतमा भवति । बृहदरण्यकोपनिषदि षट् अध्यायाः सन्ति। अयं पाठ्यभागः पञ्चमाध्यायात् स्वीकृतः।

देव-दानव-रक्षोभ्यः दम – दान - दयापराः।

जनकस्योपदेशोऽयं "द" अस्तु वेदान्तभास्करः ॥

अयमेव विषयः अस्मिन् गद्यभागे कथारूपेण वर्णितः अस्ति।



प्रजापतेः देवाः, मनुष्याः, असुराश्च इति त्रयः पुत्रगणाः आसन्। ते स्वपितुः समीपे एव शिक्षाम् अकुर्वन् । गुरुकुलशिक्षा समाप्त्यनन्तरं देवाः स्वपितरम् अब्रुवन् - 'तात! भवान् अस्मान् गुणवत्तरं किमिति उपदिशतु' इति। एतत् श्रुत्वा प्रजापतिः "द" इति एकमेव अक्षरं तेभ्यः उवाच। अनन्तरम् 'एतदक्षरस्य अर्थः ज्ञातो वा' इति अपृच्छत्। देवाः तु प्रत्यवदन् – 'अस्माभिः अवगतः एव' इति। 'द'

इत्यस्य 'दाम्यत' [इन्द्रियनिग्रहणम्] इत्यर्थः। प्रजापतिः तु 'सम्यक् अवगतः युष्माभिः' इत्यवदत्।

अनन्तरं मनुष्याः पितरम् ऊचुः – 'अस्माकं कृते कः उपदेशः?' इति । प्रजापतिः पुनः 'द' इति अक्षरम् उक्त्वा, 'तदर्थः ज्ञातो वा' इति अपृच्छत्। तेऽपि संयक् ज्ञातः इति उक्त्वा 'द' इत्यस्य 'दत्तम्' (दानम्) इत्यर्थः इति अवोचन्। प्रजापतिरपि तदङ्गीकृतवान्।

अन्ते असुराः 'अस्मान् अपि शिक्षया अनुगृह्णातु' – इति अवोचन् । प्रजापतिः तेषामपि 'द' इत्यक्षरमेव उपदिदेश। ततः तान् प्रति 'अवगतो वा' इति अपृच्छत्। असुराः अपि 'द' इत्यस्य 'दया' इति अवगतः' इति अब्रुवन्। प्रजापतिरपि तेषां समाधानम् आमोदितवान्।

तदानीं "द द द " इति मेघगर्जनेन त्रयः दकाराः देवैः आमोदिताः । देवान् प्रति उक्तस्य 'द' इत्यक्षरस्य गूढार्थः – देवाः स्वभावतः स्वेच्छाचारिणः भवन्ति । अतः तान् प्रति 'इन्द्रियनिग्रहः आवश्यकः' इत्यस्मात् कारणात् 'दाम्यत' इत्यर्थप्रचोदकं 'द' इति अक्षरम् उक्तम्।

मनुष्याः स्वभावतः स्वार्थाः भवन्ति। अतः ते स्वार्थं परित्यज्य, परेभ्यः दानं कुर्यात् इत्यर्थ -अवबोधनार्थं तान् प्रति 'द' इत्यक्षरम् उपदिष्टवान्।

असुराः स्वभावतः निर्दयाः क्रूराश्च। ते 'दयार्द्रभावेन भवितव्याः' इत्यतः तान् प्रति 'द' इति उपदिदेश।

अयमेव विषयः पूजनीयचन्द्रशेखराचार्यैः विरचिते "मैत्रीं भजत" इत्यस्मिन् पद्ये, 'दाम्यत – दत्त – दयध्वम्' इति सर्वेषां मानवजनानां क्षेमार्थम् उक्तं भवति। एवं "THE WASTE LAND" इति आङ्गलपद्ये टि-एस्-एलियट् महाभागेन अयं विषयः उल्लिखितः अस्ति।

अतः "दमः – दानं – दया " इत्येते त्रयः गुणाः अस्माभिः अवश्यं स्वीकरणीयाः ।।

## अभ्यासः

### I. कठिनशब्दार्थः -

1. शिक्षा - education
2. अवगतम् - understood
3. उपदेशः - advice



Unit 14.indd 98 18-03-2019 12:30:45

| | | |
|---|---|---|
| 4. असुराः | - | demons |
| 5. समाधानम् | - | answer |
| 6. स्वार्थाः | - | selfish |
| 7. गूढार्थः | - | hidden meaning |
| 8. स्वभावतः | - | by nature |
| 9. मैत्री | - | friendship |
| 10. दानम् | - | charity |
| 11. दमः | - | control of sense |
| 12. दया | - | mercy |

## II. समीचीनम् उत्तरं चिनुत-

1. प्रसिद्धाः उपनिषदः कति?

   (i) पञ्च (ii) अष्ट (iii) दश

2. _____________ उपनिषदि गुणत्रयकथा प्रतिपादिता।

   (i) कठ (ii) बृहदारण्यक (iii) छान्दोग्य

3. बृहदारण्यकोपनिषदि कति अध्यायाः सन्ति ?

   (i) पञ्च (ii) षट् (iii) सप्त

4. देवानां, मनुष्याणाम्, असुराणां च पिता कः ?

   (i) बृहस्पतिः (ii) प्रजापतिः (iii) कुलपतिः

5. देवेभ्यः उक्तस्य 'द' इति अक्षरस्य अर्थः कः?

   (i) दाम्यत (ii) दत्तम् (iii) दया



Unit 14.indd 99 18-03-2019 12:30:45

6. मनुष्याः स्वभावतः __________ भवन्ति?

(i) परार्थाः (ii) स्वार्थाः (iii) निरर्थाः

7. मैत्रीं भजत इति पद्यस्य रचयिता ________

(i) कालिदासः (ii) चन्द्रशेखराचार्यः (iii) आदि शङ्कराचार्यः

8. 'The waste land' इति आङ्लपद्यस्य रचयिता ________

(i) शेक्स्पियर् (ii) टि.एस्.एलियट् (iii) जान् कीट्स्

9. दाम्यत इति पदस्य अर्थः ________

(i) इन्द्रियनिग्रहणम् (ii) दानम् (iii) दया

10. त्रयः दकाराः __________ देवाः आमोदिताः ।

(i) मेघगर्जनेन (ii) प्रजापतिना (iii) जनैः

## III. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. प्रजापतेः पुत्रगणाः के?
2. प्रजापतिः स्वपुत्रगणान् किम् उपदिदेश?
3. प्रजापतिना देवान् प्रति उक्तस्य 'द' इत्यस्य गूढार्थः कः?
4. प्रजापतिना मनुष्यान् प्रति उक्तस्य 'द' कारस्य अर्थः कः?
5. असुरान् प्रति उक्तस्य 'द' इत्यस्य गूढार्थः कः?
6. स्वभावतः मनुष्याः कीदृशाः?
7. देवाः स्वभावतः कीदृशाः भवन्ति?
8. कस्मिन् आङ्गलपद्ये अस्य पाठस्य विषयः उल्लिखितः भवति?
9. देवैः प्रजापतेः वचनं कथम् आमोदितम्?
10. "मैत्रीं भजत" इति पद्यं केन लिखितम् ?



Unit 14.indd 100 18-03-2019 12:30:45

## IV. सविस्तरम् उत्तरं लिखत-

1. प्रजापतिः स्वपुत्रगणान् किम् उपदिदेश? तेषां गूढार्थान् विशदयत।
2. गुणत्रयकथां यथाग्रन्थं स्वभाषया लिखत।

## V. कोष्ठात् उचितं पदं स्वीकृत्य रिक्तस्थानानि पूरयत-

1. प्रजापतेः ___________ पुत्रगणाः आसन्। (त्रयः / चत्वारः)
2. इयं कथा ___________ उपनिषदि अस्ति। (बृहदारण्यक / मुण्डक)
3. देवान् प्रति उक्तस्य 'द' इत्यस्य ___________ अर्थः। (दाम्यत / दयध्वम् )
4. असुराः स्वभावतः ___________ (सदयाः / निर्दयाः)।
5. देवाः प्रजापतिं_________ किमिति उपदेशं करोतु इति अब्रुवन्। (गुणवत्तरं / हितवत्तरं)

## VI. आम् अथवा न इति लिखत –

1. प्रजापतेः पुत्राः स्वपितुः समीपे शिक्षाम् अकुर्वन्।
2. प्रजापतेः चत्वारः पुत्रगणाः आसन्।
3. प्रसिद्धाः उपनिषदः पञ्च सन्ति।
4. आदौ उक्तस्य 'द' इत्यस्य दत्त इत्यर्थः।
5. Waste land इति आङ्गलपद्यम् एलियट् महाभागेन लिखितम्।

***********



Unit 14.indd 101 18-03-2019 12:30:45

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

उपनिषदः प्रस्थानत्रये अन्तर्भवन्ति । दश उपनिषदां नामानि –

ईशकेनकठप्रश्नमुण्डमाण्डूक्यतित्तिरिः ।

ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथा ।।

ब्रह्मप्रापिका विद्या, तत्प्रतिपादकः ग्रन्थः च 'उपनिषत्' इति उच्यते। उपनिषत् पदस्य निर्वचनम् इत्यर्थः उच्यते आचार्यैः –

अत्र चोपनिषच्छन्दो ब्रह्मविद्यैकगोचरः।

तच्छब्दावयवार्थस्य विद्यायामेव सम्भवात् ।।

उपनिषदः कति सन्ति ? इति विषयविचारे शब्दकल्पद्रुमे एवं लिख्यते – तत्र चतुर्णां वेदानां अशीतिसहितशताधिकसहस्रसंख्याकाः उपनिषदः ।

1. ऋग्वेदसम्बद्धाः उपनिषदः दशसंख्याकाः ।

2. शुक्लयजुर्वेदसम्बद्धाः उपनिषदः एकोनविंशतिसंख्याकाः ।

3. कृष्णयजुर्वेदसम्बद्धाः उपनिषदः द्वात्रिंशत् संख्याकाः ।

4. सामवेदगताः उपनिषदः षोडशसंख्याकाः ।

5. अथर्ववेदगताः उपनिषदः एकत्रिंशत् संख्याकाः ।



Unit 14.indd 102 18-03-2019 12:30:46

वेदान्तगीतविषयाः

| | | |
|---|---|---|
| 1. ईशावस्योपनिषत् | - | शुक्लयजुर्वेदीया |
| 2. केनोपनिषत् | - | सामवेदीया |
| 3. कठोपनिषत् | - | कृष्णयजुर्वेदीया |
| 4. प्रश्नोपनिषत् | - | अथर्ववेदीया |
| 5. मुण्डकोपनिषत् | - | अथर्ववेदीया |
| 6. माण्डूक्योपनिषत् | - | अथर्ववेदीया |
| 7. तैत्तरीयोपनिषत् | - | कृष्णयजुर्वेदीया |
| 8. ऐतरेयोपनिषत् | - | ऋग्वेदीया |
| 9. छान्दोग्योपनिषत् | - | सामवेदीया |
| 10. बृहदारण्यकोपनिषत् | - | शुक्लयजुर्वेदीया |

बृहदारण्यकोपनिषत्

बृहदारण्योपनिषत् प्रमुखासु दशसु उपनिषत्सु अन्यतमा। सर्वासु उपनिषत्सु बृहद्रूपेण वर्तमानत्वात् "बृहदारण्यकोपनिषत्" इति नाम जातम्। अस्याम् उपनिषदि ऋषि-याज्ञवल्क्यस्य भागः अधिकः वर्तते। स्मृतिकर्तॄणाम् ऋषीणाम् अन्यतमः प्रज्ञानिधिः महानुभावः याज्ञवल्क्यः। याज्ञवल्क्यस्मृतिः लोकेऽस्मिन् सुप्रसिद्धा भवति। ऋषिः याज्ञवल्क्यः यजुर्वेदम् अध्येतुं सूर्यं प्रति तपश्चकार। तपसा प्रसन्नः दिवाकरः समग्रं यजुर्वेदं सर्वाः विद्याश्च तस्मै उपादिशत्। तदन्तगीता एव बृहदारण्यकोपनिषत्। अस्याम् उपनिषदि याज्ञवल्क्य - मैत्रेयसंवादः प्रशंसारूपेण भवति। अस्याः उपनिषदः भाष्याणि विविधैः मताचार्यैः कृतानि सन्ति।

अद्यतनकालेऽपि अस्य पाठस्य सारांशविषयमेव श्रीशङ्कराचार्येण विरचितं "मैत्रीं भजत" .. इति गानं श्रीमती एम्.एस्. सुब्बुलक्ष्मी महाभागया

मैत्रीं भजताऽखिलहृज्जेत्रीम्  
आत्मवदेव परानपि पश्यत।  
युद्धं त्यजत, स्पर्धां त्यजत  
त्यजत परेष्वक्रममाक्रमणम्॥  
जननी पृथिवी कामदुघाऽऽस्ते  
जनको देवः सकलदयालुः।  
दाम्यत दत्त दयध्वं जनताः  
श्रेयो भूयात् सकलजनानाम्॥

विदेशीयसमावेशे गीता इति यः विषयः वर्तते सः अस्माकं महान् आनन्दकरः भवति।



Unit 14.indd 103 18-03-2019 12:30:46

## व्याकरण–अभ्यासः - 7

### तकारान्तः पुंलिङ्गः“भवत्” शब्दः (Thee)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | भवान् | भवन्तौ | भवन्तः |
| द्वितीया | भवन्तम् | भवन्तौ | भवतः |
| तृतीया | भवता | भवद्भ्याम् | भवद्भिः |
| चतुर्थी | भवते | भवद्भ्याम् | भवद्भ्यः |
| पञ्चमी | भवतः | भवद्भ्याम् | भवद्भ्यः |
| षष्ठी | भवतः | भवतोः | भवताम् |
| सप्तमी | भवति | भवतोः | भवत्सु |
| सं.प्र | हे भवान् | हे भवन्तौ | हे भवन्तः |

### तकारान्तः स्त्रीलिङ्गः“सरित्” शब्दः (Lake)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सरित् | सरितौ | सरितः |
| द्वितीया | सरितम् | सरितौ | सरितः |
| तृतीया | सरिता | सरिद्भ्याम् | सरिद्भिः |
| चतुर्थी | सरिते | सरिद्भ्याम् | सरिद्भ्यः |
| पञ्चमी | सरितः | सरिद्भ्याम् | सरिद्भ्यः |
| षष्ठी | सरितः | सरितोः | सरिताम् |
| सप्तमी | सरिति | सरितोः | सरित्सु |
| सं.प्र | हे सरित् | हे सरितौ | हे सरितः |

### सकारान्तः नपुंसकलिङ्गः“मनस्” शब्दः (mind)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मनः | मनसी | मनांसि |
| द्वितीया | मनः | मनसी | मनांसि |
| तृतीया | मनसा | मनोभ्याम् | मनोभिः |
| चतुर्थी | मनसे | मनोभ्याम् | मनोभ्यः |
| पञ्चमी | मनसः | मनोभ्याम् | मनोभ्यः |
| षष्ठी | मनसः | मनसोः | मनसाम् |
| सप्तमी | मनसि | मनसोः | मनस्सु |
| सं.प्र | हे मनः | हे मनसी | हे मनांसि |



Unit 14.indd 104 18-03-2019 12:30:47

## अनुच्छेदलेखनम् – 7

## (Comprehension – 7)



आधुनिकयुगे यन्त्रादीनां सञ्चालनाय पाककर्मणि च सूर्योर्जसः उपयोगः भवति। ग्रामेषु यत्र विद्युत्साधनानि अल्पीयांसि सन्ति, तत्र दिने यन्त्रमाध्यमैः एकत्रितं सूर्योर्जः विद्युत् इव प्रयुज्यते। इदानीं कृषिकर्मस्वपि अस्य उपयोगः क्रियते। कूपजलैः क्षेत्राणां सेचनार्थं नूतनानि यन्त्राणि सूर्यशक्त्या सञ्चालितानि सन्ति। जीवानां स्वास्थ्याय अपि सूर्यस्य महती भूमिका अस्ति। कतिपयाः योगक्रियाः अस्य आतपे एव क्रियन्ते। अस्य रश्मीनां प्रभावेन त्वचः अपि अनेके रोगाः नश्यन्ति। ऋषेः अथर्वणः मते उदीयमानस्य सूर्यस्य रश्मिभिः अर्धशिरोवेदना दूरीकर्तुं शक्यते। अतः चिकित्सा क्षेत्रे अपि प्राकृतिकचिकित्सारूपेण सूर्यः अस्माकम् उपकारकः। सूर्यस्नानम् इति क्रियया सूर्योर्जसः 'विडामिन् डी' इति प्राप्यते यः स्वास्थ्यस्य संपोषकः स्वीक्रियते।

प्रश्नाः-

1. यन्त्रादीनां सञ्चालनाय पाककर्मणि च कस्य उपयोगः भवति ?
2. कुत्र सूर्योर्जः विद्युत् इव प्रयुज्यते ?
3. नूतनानि यन्त्राणि कया सञ्चालितानि सन्ति ?
4. रश्मीनां प्रभावेन के नश्यन्ति ?
5. सूर्यस्नानम् इति क्रियया किं प्राप्यते ?
6. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत ?



Unit 14.indd 105 18-03-2019 12:30:47

## अनुवादः – 7

## (Translation - 7)



एकदा सिद्धार्थः विहाराय उद्यानं गतवान्। सहसा सः क्रन्दनध्वनिम् अशृणोत्। तदैव च एकः हंसः तस्य संमुखे बाणेन विद्धः सन् भूमौ अपतत्। तं दृष्ट्वा सिद्धार्थः करुणापूर्णः सञ्जातः। पुनश्च सः हंसस्य शरीरात् बाणं निष्कास्य यावत् पश्यति तावत् देवदत्तः तत्र समागतः। सः सिद्धार्थम् उक्तवान्– भोः सिद्धार्थ! एषः हंसः मया भूमौ निपातितः। अतः इमं हंसं मह्यं देहि इति। सिद्धार्थः उच्चैः अवदत्– न दास्यामि इमं हंसं, यतः अहं अस्य रक्षकः। तौ परस्परं विवदमानौ राजसभां गतवन्तौ। राजा सर्वं वृत्तान्तं श्रुत्वा आदिष्टवान् – प्राणघातकात् प्राणरक्षकः श्रेष्ठः। अतः हंसोऽयं सिद्धार्थस्यैव भवेत् ।

नीतिः – अहिंसा परमो धर्मः।



Unit 14.indd 106 18-03-2019 12:30:47

# पाठ्यातिरिक्तः ज्ञातव्यः व्याकरणसेतुः





Unit 14.indd 107 18-03-2019 12:30:47

## वर्णाः उच्चारणस्थानानि च

| वर्णानाम् उच्चारण स्थानानि | स्वरः | | वर्गीयव्यञ्जनानि / स्पर्शाः | | | | | अन्तःस्थाः | ऊष्माणः | वर्णानां जन्य स्थानानि |
|---|---|---|---|---|---|---|---|---|---|---|
| कण्ठः | अ | आ | क् | ख् | ग् | घ् | ङ् | - | ह् | कण्ठ्यम् |
| तालुः | इ | ई | च् | छ् | ज् | झ् | ञ् | य् | श् | तालव्यम् |
| मूर्धा | ऋ | ॠ | ट् | ठ् | ड् | ढ् | ण् | र् | ष् | मूर्धन्यम् |
| दन्तः | लृ | - | त् | थ् | द् | ध् | न् | ल् | स् | दन्त्यम् |
| ओष्ठः | उ | ऊ | प् | फ् | ब् | भ् | म् | - | - | ओष्ठ्यम् |
| नासिका | - | - | ङ् | ञ् | ण् | न् | म् | - | - | नासिक्यम् |
| कण्ठतालु | ए | ऐ | - | - | - | - | - | - | - | कण्ठतालव्यम् |
| कण्ठोष्ठम् | ओ | औ | - | - | - | - | - | - | - | कण्ठोष्ठ्यम् |
| दन्तोष्ठम् | - | - | - | - | - | - | - | व् | - | दन्तोष्ठ्यम् |

## माहेश्वराणि सूत्राणि

अ इ उ ण्
ऋ लृ क्
ए ओ ङ्
ऐ औ च्
ह य व र ट्
ल ण्
ञ म ङ ण न म्
झ भ ञ्
घ ढ ध ष्
ज ब ग ड द श्
ख फ छ ठ थ च ट त व्
क प य्
श ष स र्
ह ल्



Unit 14.indd 108 18-03-2019 12:30:47

## प्रत्याहारः

प्रत्याह्रियन्ते वर्णाः अस्मिन् अनेन वा इति प्रत्याहारः।

यथा

| | | | |
|---|---|---|---|
| 1. | अण् | - | अ इ उ |
| 2. | अक् | - | अ इ उ ऋ लृ |
| 3. | इक् | - | इ उ ऋ लृ |
| 4. | एङ् | - | ए ओ |
| 5. | अच् | - | अ इ उ ऋ लृ ए ओ ऐ औ |
| 6. | ऐच् | - | ऐ औ |
| 7. | यण् | - | य व र ल |
| 8. | हश् | - | ह य व र ल ञ म ङ णन |
| | | | झ भ घ ढ ध ज ब ग डद |

एवं यट्, झट्, खट्, चर्, झल् इत्यादयः सन्ति ।।

## अव्ययानि

| | अव्ययानि | | उदाहरणम् |
|---|---|---|---|
| 1. | यत्र – तत्र | - | सः यत्र गच्छति, तत्र खादति। |
| 2. | सर्वत्र | - | ईश्वरः सर्वत्र अस्ति। |
| 3. | अत्र | - | त्वम् अत्र आगच्छ। |
| 4. | कुत्र | - | छात्राः कुत्र अगच्छन् ? |
| 5. | अन्यत्र | - | त्वम् अन्यत्र तिष्ठ। |
| 6. | इतः | - | त्वम् इतः गच्छ। |
| 7. | ततः | - | सीता ततः आगच्छति। |
| 8. | इतस्ततः | - | वानरः इतस्ततः धावति। |
| 9. | कुतः | - | गङ्गा कुतः उद्भवति ? |
| 10. | उपरि | - | धूमः उपरि गच्छति। |

नीचैः, अधः, बहिः, परितः, उभयतः, सर्वतः



Unit 14.indd 109 18-03-2019 12:30:47

## कालवाचकानि अव्ययानि

| | | | |
|---|---|---|---|
| 1. | अधुना | - | त्वम् अधुना किं करोषि ? |
| 2. | इदानीम् | - | अहम् इदानीं पाठं पठामि । |
| 3. | ह्यः | - | ह्यः अहं जन्तुशालाम् अगच्छम् । |
| 4. | अद्य: | - | अद्य शनिवासरः । |
| 5. | श्वः | - | श्वः त्वं कुत्र गमिष्यसि ? |
| 6. | परश्वः | - | परश्वः दीपावली अस्ति । |

संप्रति, पुरा, यदा-तदा, कदा, सदा, सर्वदा

## प्रश्नवाचकानि

| अव्ययानि | | | उदाहरणम् |
|---|---|---|---|
| 1. | कदा | - | सः कदा आगच्छति ? |
| 2. | किमर्थम् | - | त्वं तत्र किमर्थं गच्छसि ? |
| 3. | कुत्र | - | रामः कुत्र वसति ? |
| 4. | कुतः | - | सत्यभामा कुतः आगच्छति ? |
| 5. | कथम् | - | राघवः कथं गच्छति ? |
| 6. | कति | - | तत्र कति वृक्षाः सन्ति ? |

## क्रियाविशेषणबोधकानि अव्ययानि

| | | | |
|---|---|---|---|
| 1. | शनैः शनैः | - | हंसः शनैः शनैः चलति । |
| 2. | शीघ्रम् | - | त्वं शीघ्रम् आगच्छ । |
| 3. | उच्चैः | - | मेघाः उच्चैः गर्जन्ति । |
| 4. | मन्दम् | - | कच्छपः मन्दं गच्छति । |
| 5. | सहसा | - | कृष्णः सहसा खादति । |

## समुच्चयार्थकानि

| | | | |
|---|---|---|---|
| 1. | अपि | - | सः अपि आगच्छति । |
| 2. | च | - | गोविन्दः कृष्णः च पाठं पठतः । |
| 3. | तु | - | सः तु अत्रैव पठति । |



Unit 14.indd 110 18-03-2019 12:30:48

## अन्य – अव्ययानि

| | | | |
|---|---|---|---|
| 1. | एव | - | मुकुन्दः एव पाठं पठति । |
| 2. | खलु | - | अयं खलु चौरः अस्ति । |
| 3. | वृथा | - | समुद्रे वृष्टिः वृथा भवति । |
| 4. | सत्वरम् | - | रमेशः सत्वरं कार्यं करोति । |
| 5. | विना | - | विद्यया विना मानवः न शोभते । |
| 6. | यावत् – तावत् | - | यावत् गोपालः भाषणं यच्छति तावत् अत्र एव तिष्ठ। |
| 7. | इव | - | सः वैभवः इव वदति । |
| 8. | मा | - | तत्र मा गच्छ । |
| 9. | एकदा | - | एकदा अहं ग्रामम् अगच्छम् । |
| 10. | न | - | असत्यं न वद । |

## विशेषण – विशेष्यसूचकानि पदानि

| पुंलिङ्गम् | |
|---|---|
| विशेषणम् | विशेष्यम् |
| चतुरः | बालकः |
| हरितः | वृक्षः |
| कुरूपः | दानवः |
| कुशलः | जनः |
| धनवान् | मनुष्यः |
| प्रसन्नः | पुत्रः |
| स्वस्थः | शिशुः |
| कृष्णः | मेघः |

| स्त्रीलिङ्गम् | |
|---|---|
| विशेषणम् | विशेष्यम् |
| सुन्दरी | नारी |
| चपला | बालिका |
| निर्धना | महिला |
| विशाला | शाला |
| कृष्णा | धेनुः |
| पुष्पिता | लता |
| स्वस्थाः | बालिकाः |
| दुर्बला | वृद्धा |



Unit 14.indd 111 18-03-2019 12:30:48

| नपुंसकलिङ्गम् | |
|---|---|
| विशेषणम् | विशेष्यम् |
| श्वेतं | कमलम् |
| सुन्दरं | पुस्तकम् |
| शीतलं | जलम् |
| विकसितं | पुष्पम् |
| मलिनं | वस्त्रम् |
| कृष्णं | धनम् |
| सुन्दराणि | चित्राणि |
| नीलं | गगनम् |

## कारकपरिचयः

| विभक्तिः | कारकम् | वाक्यम् |
|---|---|---|
| प्रथमा | कर्ता | छात्रः लिखति। |
| द्वितीया | कर्म | सः पत्रं लिखति। |
| तृतीया | करणम् | सः कलमेन लिखति। |
| चतुर्थी | सम्प्रदानम् | अहं गुरवे पुष्पाणि आनयामि। |
| पञ्चमी | अपादानम् | वृक्षात् पत्राणि पतन्ति। |
| षष्ठी | सम्बन्धः | रामः दशरथस्य सुतः। |
| सप्तमी | अधिकरणम् | वृक्षे वानराः सन्ति। |
| संबोधन- प्रथमा | संबोधनम् | हे राम! अत्र आगच्छ। |



Unit 14.indd 112 18-03-2019 12:30:48

### कर्तृकारकम्

1. वानरः खादति ।
2. सः पठाति ।
3. तौ धावतः ।
4. महिलाः गच्छन्ति ।
5. सैनिकः रक्षति ।

### कर्मकारकम्

1. बालकः शुकं पश्यति ।
2. नरः भोजनं खादति ।
3. महिला लतां सिञ्चति ।
4. रामः फलं खादति ।
5. माता भोजनं पचति ।

### करणकारकम्

1. वृद्धः दण्डेन चलति ।
2. बालकः कन्दुकेन क्रीडति ।
3. गजाः पादैः चलन्ति ।
4. जनाः मुखेन खादन्ति ।
5. नृपः हस्ताभ्यां ददाति ।

### सम्प्रदानकारकम्

1. सा छात्राय पुस्तकं ददाति ।
2. सः पठनाय विद्यालयं गच्छति ।
3. नृपः याचकाय धनं यच्छति ।
4. माता पुत्राय दुग्धं ददाति ।
5. अध्यापकः छात्रेभ्यः ज्ञानं प्रयच्छति ।



Unit 14.indd 113 18-03-2019 12:30:48

### अपादानकारकम्

1. वृक्षात् पत्राणि पतन्ति ।
2. लतायाः पुष्पाणि पतन्ति ।
3. हिमालयात् गङ्गा प्रवहति ।
4. पथिकः गृहात् आगच्छति ।
5. वानराः भवनात् अवतरन्ति ।

### सम्बन्धे षष्ठी

1. कूपस्य जलं मधुरम् अस्ति ।
2. इदं पुस्तकं रामस्य अस्ति ।
3. पिकस्य स्वरः मधुरः भवति ।

### अधिकरणकारकम्

1. पादपे फलानि सन्ति ।
2. पुष्पेषु भ्रमराः सन्ति ।
3. सः कटे उपविशति ।
4. वने सिंहः अस्ति ।
5. गृहेषु जनाः सन्ति ।

### संबोधनकारकम्

1. हे देव ! रक्षां कुरु
2. हे राम ! अत्र आगच्छ ।
3. हे मेघ ! जलं देहि ।

## उपपदविभक्तीनां प्रयोगः

विभक्तीनां विभागः द्विधा कर्तुं शक्यः । 1. कारकविभक्तिः 2. उपपदविभक्तिः । या विभक्तिः क्रियापदमनुसृत्य उपयुज्यते सा कारकविभक्तिः । या यत्र विशेषपदनिमित्तं सामान्य कारकविभक्तिं विना अन्या विभक्तिः प्रयुज्यते, तत्र सा उपपदविभक्तिः इति कथ्यते ।।

## द्वितीया – उपपदविभक्तिः

| उपपदम् | उदाहरणम् |
|---|---|
| अभितः | अध्यापकम् अभितः छात्राः सन्ति । |
| उभयतः | नगरम् उभयतः उद्याने स्तः । |
| परितः | सूर्यं परितः ग्रहाः भ्रमन्ति । |
| सर्वतः | उपवनं सर्वतः जनाः भ्रमन्ति । |
| प्रति | कृष्णः गृहं प्रति गच्छति । |
| विना | विद्यां विना जीवनं न लभते । |
| समया / निकषा | विद्यालयं निकषा कूपः अस्ति । |
| धिक् | धिक् असत्यवादिनम् । |
| विना / ऋते | ज्ञानं विना मुक्तिः न भवति । |

## तृतीया

| उपपदम् | उदाहरणम् |
|---|---|
| विना | परिश्रमेण विना जनः सफलतां न लभते । |
| हीनः | ज्ञानेन हीनः जनः पशुः भवति । |
| अलम् | अलं विवादेन । |
| साकम् / सह /सार्धम् | पिता पुत्रेण सह क्रिडति । |
| सदृशः | अर्जुनेन सदृशः वीरः नास्ति । |
| प्रयोजनम् | दुष्टस्य परोपकारेण किं प्रयोजनम् ? |

## चतुर्थी

| उपपदम् | उदाहरणम् |
|---|---|
| अलम् | भारतीयसेना शत्रुदेशेभ्यः अलम् । |
| नमः | शिवाय नमः । |
| स्वाहा | इन्द्राय स्वाहा । |
| स्वस्ति | प्रजाभ्यः स्वस्ति । |
| ईर्ष्य् | दुष्टः सज्जनाय ईर्ष्यति । |

## पञ्चमी

| उपपदम् | उदाहरणम् |
|---|---|
| विना / ऋते | धनात् विना / ऋते सुखं नास्ति। |
| बहिः | नगरात् बहिः काननम् अस्ति। |
| पूर्वम् | मत् पूर्वं रामः तिष्ठति। |
| अनन्तरम् | कृष्णः पठनात् अनन्तरं खादति। |
| परः | सोमवासरात् परः मंगलवासरः भवति। |

## षष्ठी

| उपपदम् | उदाहरणम् |
|---|---|
| अधः | वृक्षस्य अधः मयूरः नृत्यति। |
| पुरतः | देवालयस्य पुरतः कूपः अस्ति। |
| अग्रे | रमायाः अग्रे गीता तिष्ठति। |
| उपरि | वृक्षस्य उपरि खगः वसति। |
| दक्षिणतः | मम गृहस्य दक्षिणतः चित्रशाला अस्ति। |
| वामतः | सदा मार्गस्य वामतः चलनीयम्। |
| पृष्ठतः | रक्तदुर्गस्य पृष्ठतः यमुना वहति स्म। |
| निर्धारणे | गायिकानां सीता श्रेष्ठतमा अस्ति। |
| स्मृ | शिशुः मातुः स्मरति। |

## सप्तमी

| उपपदम् | उदाहरणम् |
|---|---|
| कुशलः | अश्वः धावने कुशलः जन्तुः। |
| चतुरः | लता पाककलायां चतुरा अस्ति। |
| प्रवीणः | कमला श्लोकगायने प्रवीणा अस्ति। |
| दक्षः | अमरः लेखने दक्षः अस्ति। |
| निपुणः | हरिणी नृत्ये निपुणः अस्ति । |
| पटुः | गोविन्दः व्यवहारे पटुः अस्ति। |
| पण्डितः | सुब्रह्मण्यः गायने पण्डितः अस्ति । |
| निर्धारणे | छात्रासु विमला श्रेष्ठतमा भवति। |



Unit 14.indd 116 18-03-2019 12:30:48

## सन्धिपरिचयः

सन्धिः

- अच्सन्धिः (स्वरसन्धिः)
- हल्सन्धिः (व्यञ्जनसन्धिः)
- प्रकृतिभावसन्धिः
- विसर्गसन्धिः
- स्वादिसन्धिः

### 1. अच्सन्धिः (स्वरसन्धिः)

| | | | |
|---|---|---|---|
| 1. | सवर्णदीर्घसन्धिः | – | अकः सवर्णे अकि परे पूर्वपरयोः स्थाने दीर्घः एकादेशः स्यात् ।<br>यथा - राम + आलयः = रामालयः |
| 2. | गुणसन्धिः | – | अवर्णात् इकि परे पूर्वपरयोः स्थाने एको गुणः आदेशः स्यात् ।<br>यथा – वद + इति = वदेति |
| 3. | वृद्धिसन्धिः | – | अवर्णात् एचि परे पूर्वपरयोः स्थाने वृद्धिः एकादेशः स्यात् ।<br>यथा – रमा + एव = रमैव । |
| 4. | यणादेशसन्धिः | – | असवर्णे अचि परे इकः स्थाने यणः स्युः।<br>यथा – दधि + अत्र = दध्यत्र । |
| 5. | अयायादेशसन्धिः | – | एकारस्य ऐकारस्य च क्रमात् अय्, आय् आदेशौ स्यातां अचि परे ।<br>यथा – हरे + ए = हरये । |
| 6. | अवावादेशसन्धिः | – | ओकारस्य औकारस्य च स्थाने अव् आव् आदेशौ क्रमेण स्याताम् अचि परे ।<br>यथा – विण्णो + ए = विष्णवे । |
| 7. | पूर्वरूपसन्धिः | – | पदान्तात् एङः ह्रस्वाकारे परे पूर्वरूपम् एकादेशः स्यात् ।<br>यथा – हरे + अव = हरेऽव । |
| 8. | पररूपसन्धिः | – | अवर्णान्तात् उपसर्गात् एङादौ धातौ परे पररूपं नित्यं स्यात् ।<br>यथा - प्र + एजते = प्रेजते । |
| 9. | अवङादेशसन्धिः | – | पदान्ते गोशब्दस्य अचि परे अवङादेशो वा भवति ।<br>यथा- गो + अग्रम् = गवाग्रम् / गोऽग्रम् । |



Unit 14.indd 117 18-03-2019 12:30:48

## 2. प्रकृतिभावसन्धिः

1. पदान्ताः इकः असवर्णे अचि परे प्रकृत्या स्युः ह्रस्वश्च वा भवति –

यथा – चक्री + अत्र = चक्री अत्र / चक्र्यत्र ।

## 3. हल्सन्धिः

1. श्चुत्व सन्धिः – पूर्वत्र परत्र वा शवर्णः चवर्गान्यतरयोगे सति सकारस्य शवर्णः, तवर्गस्य चवर्गः च आदेशः भवेत् ।
   यथा - हरिस् + शेते = हरिश्शेते ।

2. ष्टुत्वसन्धिः – षकारटवर्गयोर्योगे सति सकारस्य षकारः तवर्गस्य टवर्गः च आदेशः भवति ।
   यथा – रामस् + षष्ठः = रामष्षष्ठः ।

3. जश्त्वत्वन्धिः – पदान्ते वर्तमानानां झलां स्थाने सवर्णाः जशः स्युः ।
   यथा - अच् + अन्तः = अजन्तः ।

4. अनुनासिकसन्धिः – पदान्तस्य यरः अनुनासिके परे सवर्णः अनुनासिकः वा स्यात् ।
   यथा – तत् + मुरारिः = तन्मुरारिः ।

5. अनुस्वारसन्धिः – अपदान्तयोः मकारनकारयोः झलि परे, मकारान्तपदस्य हलि परे च अनुस्वारः स्यात् ।
   यथा – हरिम् + वन्दे = हरिं वन्दे ।

6. परसवर्णसन्धिः – अपदान्तानुस्वारस्य ययि परे नित्यं परसवर्णः स्यात् ।
   यथा – अं + कितः = अङ्कितः ।

7. पूर्वसवर्णसन्धिः – झयः परस्य हकारस्य पूर्वसवर्णो वा स्यात् ।
   यथा – वाक् + हरिः = वाग्घरिः ।

8. छत्वसन्धिः – झयः परस्य शवर्णस्य छकारो वा स्यात् अमि परि ।
   यथा– तत् + शिवः = तच्छिवः ।

9. चर्त्वसन्धिः – खरि परे झलां स्थाने चरः स्युः ।
   यथा – षड् + शास्त्रम् = षट्शास्त्रम् ।

10. सत्वसन्धिः – अम्परक – छवि परतः नान्तस्य पदस्य,



Unit 14.indd 118 18-03-2019 12:30:48

अम्यपरखयि परतः पुंशब्दस्य च सकारः आगमः स्यात् ।
यथा – चक्रिन् + त्रायस्व = चक्रिंस्त्रायस्व ।

11. तुगागमसन्धिः – अजन्तस्य छकारे परे तुगागमो नित्यं स्यात् ।
यथा– राम + छत्रम् = रामच्छत्रम् ।

12. धुडागमसन्धिः – डकारात्परस्य नकारत्परस्य च सस्य धुडागमो वा स्यात् ।
यथा – षड् + सन्तः = षड् ध् सन्तः –
षड् त् सन्तः षट्त्सन्तः / षट्सन्तः ।

13. ङमुडागमसन्धिः – ह्रस्वात्परो यो ङम्, तदन्तं यत्पदं, तस्मात्परस्य अचः नित्यं ङमुडागमः स्यात् ।
यथा – प्रत्यङ् + आत्मा = प्रत्यङ्ङात्मा ।

## 4. विसर्गसन्धिः

1. पदान्तसकारस्य रेफादेशः । तस्य खरि परे अवसाने च विसर्गः स्यात् ।

   यथा – रामस् + खादति → रामर् खादति = रामः खादति ।

2. विसर्गस्य खरि परे सकारादेशः ।

   यथा - हरिः + तरति = हरिस्तरति ।

3. खर्परकशरि परे वा विसर्गस्य लोपः स्यात् । रामः + स्ताता = रामस्ताता ।

## 5. स्वादिसन्धिः

1. ह्रस्वाकारत्परस्य पदान्तसकारस्य उ इत्यादेशः स्यात् ह्रस्वाकारे, हशि च परे ।

   यथा - रामस् + अर्च्यः → राम उ अर्च्यः = रामोऽर्च्यः ।

2. अवर्णात् परस्य पदान्तसकारस्य अशि परे यादेशः।

   यथा – देवास् + इह = देवाय् + इह = देवायिह ।

3. रेफढकारलोपनिमित्तभूतयोः रेफढकारयोः परतः पूर्वस्य अणः दीर्घः स्यात् ।

   यथा - पुनर् + रमते = पुनारमते ।

4. हलि परे एतत्तदोः सुप्रत्ययस्य नित्यं लोपः स्यात् ।

   यथा - एषस् + रुद्रः = एष रुद्रः ।



Unit 14.indd 119 18-03-2019 12:30:48

## उपसर्गः

| उपसर्गः | धातुः | उत्तरम् | उपसर्गः | मूलशब्दः | उत्तरम् |
|---|---|---|---|---|---|
| अधि | गम् | अधिगच्छति | पर | उपकारः | परोपकारः |
| अनु | गम् | अनुगच्छति | प्र | आचार्यः | प्राचार्यः |
| उत् | भू | उद्भवति | कु | पुत्रः | कुपुत्रः |
| प्र | नम् | प्रणमते | सु | उक्तिः | सूक्तिः |
| आ | गम् | आगच्छति | दुर् | भावना | दुर्भावना |
| अनु | कृ | अनुकरोति | प्रति | दिनम् | प्रतिदिनम् |
| परि | त्यज् | परित्यजति | स | परिवारम् | सपरिवारम् |
| अनु | भू | अनुभवति | दुर् | जनः | दुर्जनः |
| प्र | विश् | प्रविशति | सम् | तुष् | सन्तुष्टः |
| उत् | स्था | उत्तिष्ठति | अति | अधिकः | अत्यधिकः |
| उप | कृ | उपकरोति | दुर् | आचारः | दुराचारः |
| उप | विश् | उपविशतिः | सु | आगतम् | स्वागतम् |
| आ | नी | आनयति | उप | वनम् | उपवनम् |
| प्र | सृ | प्रसरति | निर् | जनः | निर्जनः |
| अनु | सृ | अनुसरति | निर् | बलः | निर्बलः |
| वि | नश् | विनश्यति | अति | आचारः | अत्याचारः |

## समासः

अनेकपदानां एकपदत्वव्यवहारः यत्र भवति, सः समासः। सः संक्षेपतः षोढा भवति।

| समासः | तद्भेदाः |
|---|---|
| 1. तत्पुरुषसमासः | 8 |
| 2. कर्मधारयसमासः | 7 |
| 3. द्विगुसमासः | 2 |

| | | |
|---|---|---|
| 4. बहुव्रीहिसमासः | 7 | |
| 5. अव्ययीभावसमासः | 2 | |
| 6. द्वन्द्वसमासः | 4 | |

### तत्पुरुषसमासः (उत्तरपदार्थः मुख्यः)

| | | |
|---|---|---|
| 1. प्रथमातत्पुरुषः | - | पूर्वः कायस्य = पूर्वकायः । |
| 2. द्वितीयातत्पुरुषः | - | कृष्णं श्रितः = कृष्णश्रितः । |
| 3. तृतीयातत्पुरुषः | - | मासेन पूर्वः = मासपूर्वः । |
| 4. चतुर्थीतत्पुरुषः | - | यूपाय दारु = यूपदारु । |
| 5. पञ्चमीतत्पुरुषः | - | चोरात् भयम् = चोरभयम् । |
| 6. षष्ठीतत्पुरुषः | - | राज्ञः पुरुषः = राजपुरुषः । |
| 7. नञ् तत्पुषः | - | न ज्ञानं = अज्ञानम् । |

### कर्मधारयसमासः (उत्तरपदार्थप्रधानः)

| | | |
|---|---|---|
| 1. विशेषणपूर्वपदकर्मधारयः | - | नीलानि च तानि उत्पलानि = नीलोत्पलानि। |
| 2. विशेष्यपूर्वपदकर्मधारयः | - | व्यंसकाश्च ते मयूराश्च = मयूरव्यंसकाः । |
| 3. विशेषणोभयपदकर्मधारयः | - | भोज्यं च तत् उष्णं च = भोज्योष्णम् । |
| 4. उपमानोत्तरपदकर्मधारयः | - | पुरुषो व्याघ्र इव = पुरुषव्याघ्रः । |
| 5. उपमानपूर्वपदकर्मधारयः | - | द्राक्षा इव मधुरा = द्राक्षामधुरा । |
| 6. सम्भावनापूर्वपदकर्मधारयः | - | तमाल इति वृक्षः = तमालवृक्षः । |
| 7. अवधारणापूर्वपदकर्मधारयः | - | कविः एव सागरः = कविसागरः । |

### 3. द्विगुसमासः (संख्यापूर्वः)

| | | |
|---|---|---|
| 1. एकवद्भावी द्विगुः | - | पञ्चानां वटानां समाहारः – पञ्चवटी । |
| 2. अनेकवद्भावी द्विगुः | - | षण्णां मातॄणां अपत्यं पुमान् – षाण्मातुरः । |

### 4. बहुव्रीहिसमासः (अन्यपदार्थप्रधानः)

1. द्विपदबहुव्रीहिः - प्राप्तः अग्निः यं सः – प्राप्ताग्निः ।

2. बहुपदबहुव्रीहिः - नीलं उज्जवलं च वपुः यस्य सः – नीलोज्ज्वलवपुः ।

3. संख्योभयपदबहुव्रीहिः - द्वौ वा त्रयो वा – द्वित्राः ।

4. संख्योत्तरपदबहुव्रीहिः - दशानां समीपे ये सन्ति ते – उपदशाः ।

5. सहपूर्वपदबहुव्रीहिः - कलाभिः सह वर्तन्ते इति – सकलाः ।

6. दिगन्तराललक्षणबहुव्रीहिः - उत्तरस्याश्च पूर्वस्याश्च दिशः यदन्तरालं – उत्तरपूर्वा।

7. व्यतिहारलक्षणबहुव्रीहिः - केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं – केशाकेशि ।

## 5. अव्ययीभावसमासः (पूर्वपदार्थप्रधानः)

1. अव्ययपूर्वपदाव्ययीभावः - अहनि अहनि – प्रत्यहम् ।

2. नामपूर्वपदाव्ययीभावः - सूपस्य लेशः – सूपप्रति ।

## 6. द्वन्द्वसमासः (उभयपदार्थप्रधानः)

1. द्विपदेतरेतरयोगद्वन्द्वः - कंसश्च रावणश्च – कंसरावणौ ।

2. बहुपदेतरेतरयोगद्वन्द्वः - वापीच कूपश्च तटाकश्च – वापीकूपतटाकाः ।

3. द्विपदसमाहारद्वन्दः - शीतं च उष्णं च तयोः समाहारः – शीतोष्णम् ।

4. बहुपदसमाहारद्वन्द्वः - पाणी च पादौ च ग्रीवा च तेषां समाहारः - पाणिपादग्रीवम् ।

## प्रत्ययाः




## 1. कृत् – प्रत्ययाः

तुमुन् - पठ् + तुमुन् = पठितुम्

क्त्वा - पठ् + क्त्वा = पठित्वा

ल्यप् - वि + हस् + ल्यप् = विहस्य

क्त - खाद् + क्त = खादितः

क्तवतु - कुप् + क्तवतु = कुपितवान् / कुपितवत्

तव्यत् - चल् + तव्यत् = चलितव्यः

अनीयर् - कुप् + अनीयर् = कोपनीयः

शतृ - गम् + शतृ = गच्छन् / गच्छत्

शानच् - याच् + शानच् = याचमानः

## 2. तद्धितप्रत्ययाः –

मतुप् – बुद्धि + मतुप् = बुद्धिमान् / बुद्धिमती / बुद्धिमत्

णिनि – योग + णिनि – योगिन् – योगी / योगिनी / योगी

ठक् – धर्म + ठक् – धार्मिक – धार्मिकः / धार्मिका / धार्मिकम्

त्व – 1. धर्म + त्व – धर्मत्वम् 2. चारु + त्व - चारुत्वम्

तल् – 1. कटु + तल् – कटुता 2. गुरु + तल् – गुरुता

## 3. स्त्रीप्रत्ययाः

टाप् – दक्ष + टाप् = दक्षा

सरल + टाप् = सरला

ङीप् -कर्तृ + ङीप् = कर्त्री

गोप + ङीप् = गोपी

नट + ङीप् = नटी

## प्रथमपुरुषः, मध्यमपुरुषः, उत्तमपुरुषः

| (i) प्रथमपुरुषः | | | |
|---|---|---|---|
| (i) | एकवचनम् | द्विवचनम् | बहुवचनम् |
| | एषः | एतौ | एते |



Unit 14.indd 123 18-03-2019 12:30:49

| | | | |
|---|---|---|---|
| | एषा | एते | एताः |
| | एतत् | एते | एतानि |

| | | | |
|---|---|---|---|
| (ii) | सः | तौ | ते |
| | सा | ते | ताः |
| | तत् | ते | तानि |

| | | | |
|---|---|---|---|
| (iii) | कः | कौ | के |
| | का | के | काः |
| | किम् | के | कानि |

| | | | |
|---|---|---|---|
| (iv) | बालकः | बालकौ | बालकाः |
| | बालिका | बालिके | बालिकाः |
| | फलम् | फले | फलानि |

## पुल्लिङ्गः

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| एषः बालकः । | एतौ बालकौ । | एते बालकाः । |
| एषः वृषः । | एतौ वृक्षौ । | एते वृक्षाः । |
| एषः सिंहः । | एतौ सिंहौ । | एते सिंहाः । |
| एषः शुकः । | एतौ शुकौ । | एते शुकाः । |
| एषः वानरः । | एतौ वानरौ । | एते वानराः । |
| सः बालकः । | तौ बालकौ । | ते बालकाः । |
| सः वृक्षः । | तौ वृक्षौ । | ते वृक्षाः । |
| सः सिंहः । | तौ सिंहौ । | ते सिंहाः । |
| सः शुकः । | तौ शुकौ । | ते शुकाः । |



Unit 14.indd 124 18-03-2019 12:30:49

| | | |
|---|---|---|
| सः वानरः । | तौ वानरौ । | ते वानराः । |

## स्त्रीलिङ्गः

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| एषा बालिका । | एते बालिके । | एताः बालिकाः । |
| एषा लता । | एते लते । | एताः लताः । |
| एषा माला । | एते माले । | एताः मालाः । |
| एषा पेटिका । | एते पेटिके । | एताः पेटिकाः । |
| एषा नौका । | एते नौके । | एताः नौकाः । |
| सा बालिका । | ते बालिके । | ताः बालिकाः । |
| सा लता । | ते लते । | ताः लताः । |
| सा माला । | ते माले । | ताः मालाः । |
| सा पेटिका । | ते पेटिके । | ताः पेटिकाः । |
| सा नौका । | ते नौके । | ताः नौकाः । |

## नपुंसकलिङ्गः

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| एतत् फलम् । | एते फले । | एतानि फलानि । |
| एतत् पत्रम् । | एते पत्रे । | एतानि पत्राणि । |
| एतत् गृहम् । | एते गृहे । | एतानि गृहाणि । |
| एतत् वनम् । | एते वने । | एतानि वनानि । |
| एतत् पुष्पम् । | एते पुष्पे। | एतानि पुष्पाणि। |
| तत् फलम् । | ते फले । | तानि फलानि । |
| तत् पत्रम् । | ते पत्रे । | तानि पत्राणि । |
| तत् गृहम् । | ते गृहे । | तानि गृहाणि । |
| तत् वनम् । | ते वने । | तानि वनानि । |



Unit 14.indd 125 18-03-2019 12:30:49

| | | |
|---|---|---|
| तत् पुष्पम् । | ते पुष्पे । | तानि पुष्पाणि । |

(ii) मध्यमपुरुषः

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| त्वम् | युवाम् | यूयम् |

(iii) उत्तमपुरुषः

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| अहम् | आवाम् | वयम् |

## ध्यायेन पठन्तु

| | | |
|---|---|---|
| 1.अहम् अध्यापकः | त्वं छात्रः | |
| 2.अहं वृद्धः | त्वं बालकः | |
| (i) अहम् अध्यापकः | आवाम् अध्यापकौ | वयम् अध्यापकाः |
| त्वं छात्रः | युवां छात्रौ | यूयं छात्राः |
| (ii) अहं वृद्धः | आवां वृद्धौ | वयं वृद्धाः |
| त्वं बालकः | युवां बालकौ | यूयं बालकाः |
| 1.अहम् अध्यापिका | त्वं छात्रा | |
| 2.अहं वृद्धा | त्वं बालिका | |
| (i) अहम् अध्यापिका | आवाम् अध्यापिके | वयम् अध्यपिकाः |
| त्वं छात्रा | युवां छात्रे | यूयं छात्राः |
| (ii) अहं वृद्धा | आवां वृद्धे | वयं वृद्धाः |
| त्वं बलिका | युवां बालिके | यूयं बालिकाः |

| प्रथमपुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | ति | तः | न्ति |
| पठ् | पठति | पठतः | पठन्ति |



Unit 14.indd 126 18-03-2019 12:30:49

| मध्यमपुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | त्वम् | युवाम् | यूयम् |
| पठ् | पठसि | पठथः | पठथ |

| उत्तमपुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | अहम् | आवाम् | वयम् |
| पठ् | पठामि | पठावः | पठामः |

## ध्यानेन पठन्तु

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | एषः / सः / बालकः<br>एषा / सा / बालिका<br>एतत् / तत् / पुस्तकम्<br>पतति | एतौ / तौ / बालकौ<br>एते / ते / बालिके<br>एते / ते / पुस्तके<br>पततः | एते / ते / बालकाः<br>एताः / ताः / बालिकाः<br>एतानि / तानि / पुस्तकानि<br>पतन्ति |

| | | | |
|---|---|---|---|
| मध्यमपुरुषः | त्वम् | युवाम् | यूयम् |
| | पतसि | पतथः | पतथ |

| | | | |
|---|---|---|---|
| उत्तमपुरुषः | अहम् | आवाम् | वयम् |
| | पतामि | पतावः | पतामः |



Unit 14.indd 127 18-03-2019 12:30:49

# संस्कृतमनोहरी - Class XII
# List of Authors and Reviewers


### Chair Person

Dr. **R. Thiagarajan,** M.A., Ph.D.,
Former Prof. of P.G. & Research Dept. of Sanskrit,
Presidency College, Chennai.

### Reviewer

Dr. **V. Mohan,** M.A., Ph.D.,
Asst. Director, CPR Institute of Indological
Research Centre, Alwarpet, Chennai.

### Authors

**K. Maheswari,** Siromani, Sikshasastri,
PG Asst. in Sanskrit,
Sri Ahobila Math OHSS, Chennai.

**Dr. K.Rama,** M.A, M.Phil, B.Ed, Ph.D, AHM,
R.K.M. Sarada Model Girls Hr.Sec. School,
T.Nagar, Chennai.

**R. Sridhar**, Siromani, M.A., B. Ed.,
The Principal (Aca.), Bharati Vidya Bhavan MHSS, Erode.

**K.S. Kannan**, M.A., M.Phil., B.Ed.,
PG Asst. in Sanskrit,
The Gopalapuram Boys Hr.Sec.School, Chennai.

Dr. **K. Mallikeshwaran**, M.A., B.Ed., Ph.D.,
PG Asst. in Sanskrit, DAV MHSS, Mugappair, Chennai.

**K. Narayanan**, M.A., B.Ed.,
PG Asst. in Sanskrit, GK Shetty MHSS,
Adambakkam, Chennai.

**T. Lalithasubbalakshmi**, M.A., M.A., M.Ed., M.Phil., PG
Asst. in Sanskrit, Anna Adarsh MHSS,
Anna Nagar, Chennai.

Dr. **V.V. Rajeswari**, M.A., M.Ed., Ph.D.,
PG Asst. in Sanskrit, Sri Ahobila Math OHSS, Chennai.

**S. Muthukumaraswamy**, Siromani, M.A., M.Phil., B.Ed.,
Sanskrit Pandit, Sri Ahobila Math OHSS, Chennai.

**B.S. Srikanth**, Siromani, M.A., B.Ed.,
PG Asst. in Sanskrit, Sir Sivaswamy Kalalaya HSS,
Mandaveli, Chennai.

**V. Sriram**, Siromani, M.A., M.Phil., B.Ed.,
Sanskrit Pandit, Sri Ahobila Math OHSS, Chennai.

### Text Book Writing

**Indological Research Institute**, CPR Foundation,
Alwarpet, Chennai.

### Co-ordinator

**K.Chandrasekaran**
Lecturer, DIET, Chennai.

## Art and Design Team

Layout
**Thy designer**

QC
**Manohar Radhakrishhnan**

Wrapper Design
**Kathir Arumugam**

Co-ordination
**Ramesh Munisamy**

Typist
**Shanthi**



This book has been printed on 80 G.S.M.
Elegant Maplitho paper.

Printed by offset at: